CC-0. In Public Domain. Digitization by eGangotri

श्रीविन्ध्येश्वर्यै नमः ।

अथ स्वरप्रक्रियाप्रयोगप्रकरणम् ।

तत्र च साधारणस्वरप्रयोगाः ॥ १ ॥

(१)गोपायतं नः | अन्यत्रेति किम् ?

॥ श्रीः ॥

अथ स्वरप्रक्रियाप्रयोगसाधनप्रकारः ॥ १ ॥

स्वरसिद्ध्यर्थं प्रकरणमिदं प्रणीतम् । अन्तिममेकं परित्यज्य सर्वं पदमनुदात्तं भवेदिति सूत्रार्थः । अस्वरितत्वात् नाधिकारश्च । तमेकमचं यत्तदोर्नित्यसम्बन्धात् यस्योदात्तस्वरितविधानं करोति, वर्जनमपि भवति तस्यैव । अत्र च-एकग्रहणं विधीयमानस्योपलक्षणम् । तेन 'तवैचान्तश्च युगपद्' इत्यत्र अन्तोदात्ते ऽनन्तर विधानेचोभयोर्वर्जनम् । यथा 'इन्द्रा बृहस्पती' इत्यत्र 'देवताद्वन्द्वे च' इति सूत्रेण पदद्वयस्यापि विधेये प्रकृतिस्वरे त्रयाणां निषेधः । बृहस्पति शब्दस्तु वनस्पत्यादित्वादाद्युदात्त एव ।

ननु 'गोपायतं नः' इत्यत्र गुप् इत्यस्य 'धातोः' इति सूत्रेणोकारस्यान्तोदात्ते, तत आय प्रत्यये 'आद्युदात्तश्च' इति प्रत्यय स्वरेण चाद्युदात्ते ततः 'सनाद्यन्ताः' इति सत्यां धातुसंज्ञायां 'धातोः' इत्यनेन यकाराकारस्योदात्ते पूर्वोक्तयोरुदात्तयोः सतोऽन्तप्रवृत्तत्वात्सतिशिष्टः स यकाराकार एवोदात्तः । अतेऽयमेव वलवान् । अस्यच 'अनुदात्तौ सुप्पितौ' इत्यनेन अनुदात्तेन शबकारेण सह 'अतोगुणे' इत्यनेन पररूपे कृते 'एकादेश उदात्तेनोदात्त' इत्यनेनोदात्ते थसस्तमादेशे तस्य 'तास्यनुदात्तेन्ङिददुपदेशात्' इत्यनेन अदुपदेशात्—परत्वात्—अनुदात्तत्वम् । तस्य च 'उदात्तादनुदात्तस्य स्वरितः' इत्यनेन स्वरिते 'स्वरितात्संहितायामि'ति नकारस्य-एकश्रुतौ "गोपायतं नः" इति सिद्धं रूपंस्वरस्य । शमिति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१) यज्ञं॑ य॒ज्ञम॒भि॒गृ॒णी॒तः | (२) दे॒वीं वाच॑म्

नन्वत्र तमिति स्वरितस्वरमाश्रित्य 'अनुदात्तं पदम्' इति परिभाषा सूत्रेण—शेषनिघातःस्यादित्येवं चेत्—मा—एवम्। त्रिपाद्यां न प्रवर्तते यथोद्देशपक्षाश्रयणेनेयं परिभाषा। प्रमाणमप्यत्रैव 'तव्यतस्तित्वम्' यतोऽऽनावः' इति च।

अत्र च कीदृशं सति शिष्टत्वम्—यो हि यस्मिन् सति शिष्यते स शिष्टः तस्यैव बाधको भवति 'इति सतिशिष्टस्वरार्थः। एवं हि सति शिष्टस्य बाधकत्वं युक्तमेव। तथा ह्यनया उदात्तस्वरित विधिभिरेकवाक्यतयापन्नया शेषनिघातः क्रियते' तत्र च उत्सर्गस्य अपवादस्य वा या अन्तिमा प्राप्तिस्तत्र—अस्या उपस्थाने पूर्वा प्रवृत्ता प्रवृत्ति र्बाध्यते यथा च तत् 'औपगवत्वमि'ति निष्पन्ने शब्देऽण् प्रत्यये त्वप्रत्यये च 'आद्युदात्तश्च' इति सूत्रप्रवृत्तौ स्वस्यैव प्रथमप्रवृत्तिं बाधते द्वितीयप्रवृत्या लक्ष्यं संसिध्यतीति च। इति शम्।

नन्वत्र यदि सतिशिष्टः स्वरो बलवान् चेत् तर्हि सतिशिष्टत्वात् विकरणस्वरोऽपि बलवान् स्यादेवं सति 'गृणीत' इत्यादौ मध्योदात्तं पदं स्यादत उक्तम्—'अन्यत्र विकरणेभ्यः' इति। अस्यार्थस्त्वेवं विध एव सतिशिष्टोऽपि विकरणस्वरः प्रत्ययस्वरं न बाधते। प्रमाणमप्यत्रैव तासेःपरस्य लसार्वधातुकस्य—अनुदात्तविधानम्। तथैव हि—यद्यपि लावस्था तासिर्विधीयते तथाऽपि लकारमात्रापेक्षत्वात्—अन्तरङ्गेषु परेषु लादेशेषु कृतेषु च पश्चात् तासिरिति तत्स्वरस्य सतिशिष्टत्वात् शेषनिघातेनैवसिद्धेस्तत्तु—अनर्थकं स्यात्॥

(१) नन्वत्र 'यज्ञं यज्ञमभिगृणीत' इति 'गृणीत' पदमन्तोदात्तं 'उक्तवार्तिके' अन्यत्र ग्रहणाभावेऽनिष्टनिघातादि श्रवणं स्यात्। अत्र च अदुपदेशेति तकारकरण सामर्थ्यात् श्नाप्रत्ययस्य चादन्तत्वाभावात् 'तास्यनुदात्तेत्' इत्यनेन ल सार्वधातुक निघातोन भवति। तथा च 'तिङ्ङतिङः' इत्यनेन निघातस्तु न भवति 'यद्वृत्तान्नित्यम्' इति शास्त्रनिषेधात व्यवहितेऽपि हि तच्छास्त्रं प्रवर्तते। इह च 'आद्युदात्तश्च' इत्यनेन ततः प्रत्ययस्याद्युदात्तः स्वरः शिष्टः। सतिशिष्टोऽपि 'श्ना' इत्यस्य स्वरो न शिष्यते किन्तु तस एवेति शम्।

(२) नन्वत्र 'देवींवाचम्' इति अच् प्रत्ययान्तत्वाद्देवशब्दः'चितः' इत्यन्तोदात्तः। पचादिगणे देवशब्दपाठसत्वे 'टिड्ढेति' सूत्रेण 'ङीप्' भवति तस्यच 'अनु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१)देवद्रीचीं नयत देवयन्तः
(२)दाधीचः
माधूचः
(३)अग्न इन्द्र वरुणमित्रदेवाः
(४)इमं मे गङ्गे यमुने सरस्वती
अपादादौ किम् ?
शुतुद्रीस्तोमम्
अग्न इन्द्र
अग्ने तेजस्विन्
अग्ने त्रातः
सामान्यवचनं किम् ?
पर्यायेषु मा भूत्
अघ्न्ये देवि सरस्वति
देवीःषडुर्वीरुरुनःकृणोत
देवा शरण्याः
द्रवत्पाणी शुभस्पती
यच्चे दिवो दुहितर्मर्तभोजनम्
परशुना वृश्चन्
अयमग्ने जरिता
एतेनाग्नेब्रह्मणा
आते पितर्मरुताम्
प्रतित्वा दुहितर्दिवः

दात्तौ सुप्पितौ' इत्यनेनानुदात्तत्वे 'यस्येति च' इत्यकारलोपे 'अनुदात्तस्येति' सूत्रेणो-दात्ते रूपमुक्तं सुसिद्धम्। अत्रङीबुदात्तः। ननु नह्युदात्ते स्वरिते वा परे उदात्तलोपोऽस्तीति व्यर्थमिदं 'अनुदात्तस्य च' इति सूत्रम् 'इत्यादिबहुविधं प्रपञ्चितम्।

(१) ननु 'देवद्रीचींनयत देवयन्त' इत्यत्र 'देव अच्' इत्याकारे 'विष्वग्दे-वयोः" इति देवशब्दस्याद्र्यादेशे 'उगितश्चे'ति ङीपि 'अचः' इत्यनेनाञ्चतेरकारलोपे 'चौ' इति दीर्घत्वे 'द्री' इत्यस्यैकारोदात्तत्वे 'उदात्तादनुदात्तस्य स्वरितः' इत्यनेन द्रीतीकारोदात्तात्परस्य द्रीतीकारस्य स्वरितत्वे शुद्धरूपं प्रसिद्धम्।

(२) ननु 'दाधीच' इत्यत्र 'अतद्धित' इति वार्तिकेन प्रत्ययस्वरत्वम्। नो चेत् 'देव, द्रीचीम्' इत्यत्र यथा उदात्तनिवृत्तिस्वरं बाधते तथैव सतिशिष्टस्वरो 'दाधीच' इत्यत्रापि प्रत्ययस्वरं बाधते 'तस्मादतद्धित' इति वाच्यम्। एवं च सति–उदात्तनि-वृत्ति स्वरस्यायमपवादः इति निश्चितम्। 'दधीच' इत्यत्र तु प्रत्ययस्वर एवेति दधि अच् 'अण्' इति दशायां अण् स्वरस्योदात्तत्वे कृते सति 'अचः' इत्यकारलोपे सति शिष्टत्वात् 'चौ' इति प्राप्तः स्वरो निषिध्यते। इति प्रत्यस्वर एवेतिशम्।

(३) उच्चस्वरेणोच्चारितः स्वरः—'उदात्तः' भवति।

(४) नीचस्वरेणोच्चारितः स्वरः—'अनुदात्तः' भवति॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उच्चैरधीयान
उपांश्वधीयान
(१)अस्यभि हि
खलभ्वांशा
वोऽश्वाः
क्वावरं मरुतः
वी३दं ज्योतिर्हृदये
अस्यश्लोको दिवीयते
तेऽवदन्
सो३यमागात्
अग्निमीले
तमीशा नासः
प्र य आ रुः
वोऽश्वाः
क्वा३भीशवः
(२)आगच्छ भो माणवक
अग्निर्मूर्धा दिवःककुत्
यज्ञेति किम् ?
स्वाध्यायकाले त्रैस्वर्यमेव
अजपेति किम् ?
ममाग्ने वर्चोविहवेष्वस्तु
(३)जपोनाम
(४)न्यूङ्खा नाम
सुब्रह्मण्यो३म्
गार्ग्यो यजते
दाक्षेः पिता यजते
देवाः ब्रह्माण आगच्छत

(१) उदात्तानुदात्तसधर्मेणोच्चारितः स्वरः 'स्वरितः' भवति। अत्रस्थविचारस्तु स्वरसञ्चारे द्रष्टव्यः।

(२) दूरात् सम्बोधनाभिप्रायेणोच्चारितत्वे स्वरविशेष्याभावेत्रैस्वर्यमपवाद्य विहितः 'एकश्रुतिः' इति उदात्तादीनां स्वराणामपार्थक्येनैकत्रावस्थानमेकश्रुतिः। वेदे मन्त्राश्च त्रैस्वर्येण पठ्यन्ते। तर्हि यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते—एकश्रुतिविधानम्।

(३) जपोनाम उपांशुप्रयोगः। तल्लक्षणन्तु—

शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ न चालयेत्।
अपरैर्न श्रुतः किञ्चित्स 'उपांशु' जपः स्मृतः॥ अत्रत्वेवंविधविवेकः॥

(४) न्यूङ्खा नामषोडश ओंकाराः गीतिषु सामाख्या। जपोऽ'नुकरणमन्त्रः' 'उपांशु' प्रयोगः। सामानि वाक्यविशेषस्य गीतय उच्यन्ते। नतत्रैकश्रुतिर्भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इमं मे गङ्गे यमुने सरस्वति
(१)सरस्वति शुतुद्रि

ठ्यं चक्रयत्स्वः
(२)दिवेदिवे

इतिस्वरप्रक्रियासाधारणस्वरप्रयोगाः ॥ १ ॥

अथस्वरप्रक्रियाधातुस्वरप्रयोगाः ॥ २ ॥

(३)गोपायतं नः
(४)असि सत्यः
स्वपन्ति
श्वसन्ति
हिंसन्ति
स्वपानि
हिनसानि

ये ददति प्रिया वसु
दधाना इन्द्रे
दधासि रत्नं द्रविणं च दाशुषे
योऽग्निहोत्रं जुहोति
शमस्तु नः परिज्मा

---

(१) ननु 'उदात्त स्वरितपरस्य सन्नतरः' सूत्रोच्चरित सन्नतरशब्दार्थः— 'सन्नतरः=अनुदात्ततरः' इत्यर्थः । अत्र च 'सरस्वति शुतुद्रि' सरस्वतीत्यस्यामन्त्रित निघातो भवति ननु शुतुद्रि शब्दस्य मन्त्रांशे पादादित्वात् । षाष्ठेन 'आमन्त्रितस्य' इत्यनेन शुतद्रीत्यस्योदात्तं प्रथमं–अक्षरं तस्मिन्परे पूर्वस्य सरस्वतीकारस्य सन्नतरत्वे सिद्धमिष्टम् ।

(२) ननु 'दिवेदिवे' इत्यत्राम्रेडित संज्ञायाम् 'अनुदात्तं च' इत्यनेन पररूपस्यानुदात्तत्वे पररूपस्थद्रीकारस्य स्वरितत्वे रूपमिष्टं प्रसिद्धम् । अत्र स्वरसाधारण्यम् । एकस्मिन्पदे पदद्वयेऽपि च वर्तमानहेतोः साधारण्यमिति शम् ।

इति साधारणस्वरप्रक्रियासाधनप्रकारः ॥ १ ॥

अथ धातुस्वरप्रक्रियासाधनप्रकारः ॥ २ ॥

(३) अस्य साधनप्रकारः प्रदर्शितः साधारणस्वरे ३३ पृष्ठे द्रष्टव्यः ।

(४) ननु 'असि सत्यः' इत्यत्र अस् धातोः सिपि प्रत्यये 'धातोः' सूत्रेणाकारस्योदात्तत्वे 'तासस्त्योः' इति सलोपे परस्य प्रत्ययेकारस्य स्वरितत्वे ततः परस्थितस्य शब्दस्य सकारात्परस्य विद्यमानात् "उदात्तस्वरित परस्यसन्नतरः" इत्यनेनानुदात्ततरादेशे 'असि सत्यः' इति रूपमिष्टं प्रसिद्धम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मा॒ता यद्वी॒रं द॒धन॑त्
जा॒गर्षि॒ त्वम्
चिकीर्षकः
लोलूयं लोलूयम्
लूयते केदारः स्वयमेव
(१)मा हि चीकरताम्

इतिस्वरप्रक्रियाधातुस्वरप्रयोगाः ॥ २ ॥

अथस्वरप्रक्रियाप्रातिपदिकस्वरप्रयोगाः ॥ ३ ॥

(२) कर्षः
कर्षः
पाकः
वै॒श्वा॒न॒रः
कु॒शि॒केभि॑र्यु॒गे यु॑गे
योगे योगे त॒वस्त॑रम्
गाव॒ः सोम॑स्य प्रथ॒मस्य॑ भ॒क्षः
उत्तमशश्वत्तमावपि
उ॒दु॑त्त॒मं व॑रुण
श॒श्व॒त्तममीलते
चतुरः कल्पयन्तः
चतस्रः पश्य
अ॒ध्व॒र्युभि॑ः प॒ञ्चभि॑ः
न॒वभि॒र्वाजै॑र्न॑व॒तीच॑
स॒प्तभ्यो॒ जाय॑मानः
आ॒ष्ट॒शभि॒ र्वि॒वस्व॑तः
उपोत्तमं किम् ?

(१) ननु 'माहि चीकरताम्' इत्यत्र धात्वकार उदात्तः पक्षान्तरे चङुदात्तः। अत्र तु चङ्यन्यतरस्याम्' इत्यनेन चङन्ते धातावुपोत्तमुदात्तंस्यात्। इति त्र्यादीनामन्त्यमुत्तमं तस्यसमीपमुपोत्तममित्यर्थः। लसार्वधातुकानुदात्तत्वेकृते चङ एवस्वरे प्राप्ते अदुपेदशातपरत्वेन धात्वकार उदात्तः। उपोत्तमविवेकानुवृत्त्या न द्वयोःप्रकारः।

इति धातुस्वरप्रक्रियासाधनप्रकारः ॥ २ ॥

अथ प्रातिपदिकस्वरप्रक्रियासाधनप्रकारः ॥ ३ ॥

(२) अत्र च–आदस्यास्तीत्वान् 'तसौमत्वर्थे' भत्वाज्जश्त्वे कर्षश्च–आत्वांश्चेति समाहारद्वन्द्वे 'ञ्नित्यादिर्नित्यम्' इत्यपवादाद्युदात्तमनेनान्तोत्तत्वं विधीयते कर्षतेर्धातो राकारवतश्च घञन्तस्यान्त उदात्तः स्यात्। कर्ष इत्यत्र तु–अन्तोदात्त एव। शपानिर्देशात्तुदादेश्चेत् प्रयोगस्तदाद्युदात्त एवेति विवेकः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आषड्भिर्हूयमानः
विश्वैर्देवैस्त्रिभिः
ऋत्वि किम् ?
नवानां नवतीनाम्
सर्वे नन्दन्ति यशसा
अस्मिन्विश्वानि पौंस्या
सुते दधिष्वनश्चनः
अयं पन्था
सर्वनामस्थाने किम् ?
ज्योतिष्मतः पथोरक्ष
हर्षसे दातवाउ
स्वे क्षये शुचि
जयेऽश्वः
वाजेभिर्वाजिनीवती
इन्द्रं वाणी
(१)चञ्चेव चञ्चा
संज्ञायां किम् ?
अग्निर्माणवकः
उपमानं किम् ?
चैत्रः
दत्तः
अच् किम् ?
चिन्तितः
अनात् किम् ?
त्रातः
कृतम्
हृतम्
अतसं न शुष्कम्
कृषन्निफाल आशितम्
रिक्तः
जुष्टो दमूनाः
षळर आहुरर्पितम्
अर्पिताः षष्टीर्न चलाचलासः
नहिषस्तव नो मम
तुभ्यं हिन्वानः
मह्यं वातः पवताम्
युञ्जन्त्यस्य काम्या
अनावः किम् ?
नवतिं नाव्यानाम्
ईडयो नूतनै रुत
आजुह्वान ईड्योवन्द्यश्च
श्रेष्ठं नो धेहि वार्यम्
उक्थमिन्द्राय शंस्यम्
इन्धानो अग्नम्

(१) नन्वत्र 'चञ्चेव चञ्चा' इत्यत्र 'संज्ञायामुपमानम्' इत्यनेनोपमानशब्दस्याद्युदात्तत्वे कनो लुपि सिद्धमेव रूपम् । ननु प्रत्ययलक्षणेन नित्यत्वदर्शनात् 'ञ्नित्यादिर्नित्यम्' इत्यनेनैव सिद्धमेतदेवेति ज्ञापयति क्वचित् स्वरविधौ प्रत्ययलक्षणं न ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१)उदुम्बरावती
शरावती
(२)वेत्रवती
(३)अहीवती
मुनीवती

इतिस्वरप्रक्रियाप्रातिपदिकस्वरप्रयोगाः ॥ ३ ॥

१ अथस्वरप्रक्रियाफिट्स्वरप्रयोगाः ॥ ४ ॥

(४)उच्चैः
पाटलाः

(१) अत्र चार्थव्याख्यानमेव शरणम्—सूत्रे हि शब्दस्वरूपापेक्षया पूर्वशब्दे नपुंसकनिर्देशः । पूर्वशब्दं केचितु पुल्लिङ्गमेव पठन्तीति ।

(२) मतुपि वत्वे च वेत्रवतीति रूपसिद्धिः । नचात्र वत्वस्यासिद्धत्वात् नायमवती शब्दो भवतीति शङ्कयम् । तस्याश्रयत्वात् सिद्धत्वेन—असिद्धत्वस्य—अभावात् । राजवतीत्यत्र तु—'अवत्याः' निर्देशान्न भवति । हि स्वरविधौ व्यञ्जनस्याविद्यमानत्वान्नायमवतीशब्दः । इति ॥

(३) अीहवतीत्यत्र तु पूर्ववदेवदीर्घे 'संज्ञायाम्' इति वत्वे च 'अहीवती' इति प्रसिद्धम् ।

इति प्रातिपदिक् स्वरप्रक्रियासाधनप्रकारः ॥ ३ ॥

१ अथ फिट्सूत्रीयप्रथमपादस्वरप्रक्रियासाधनप्रकारः ॥४॥

(४) अत्र च फिट्सूत्रे विचारः । 'फिषोऽन्त उदात्तः' इत्यत्रप्रातिपदिकं फिट् तस्य च अन्तोदात्तोभवतीत्यर्थः । परञ्च पूर्वाचार्यप्रसिद्धया प्रतिपदिकं तु फिटः संज्ञा । ननु पाणिनीयशास्त्रसिद्धस्वरएव प्रमाणम् । कथमपाणिनीयसूत्रादरः । कैयटोऽप्याह 'शताच्चठन्यतावशते' इति सूत्रे नियतकालाश्च स्मृतयो व्यवस्थाहेतवो भवन्तीति मुनित्रयमते नाद्यत्वे साध्वसाधुप्रविभागः' इति नैतत् 'अपाणिनीयान्यपि फिट्सूत्राणि पाणिनीयैराश्रियन्ते—इति भाष्यात् ज्ञापकबालात्' इत्यस्यासिद्धत्वम् ।

एवञ्च 'आद्युदात्तश्चेति सूत्रे भाष्येध्वनितम्'—'प्रातिपदिकस्य च—अन्त इति प्रकृतेरन्तोदात्तत्वं शास्ति' इत्युक्तसूत्रेऽप्येव प्रत्ययाद्युदात्तस्यावकाशः सूचितः । यत्र—अनुदात्ता प्रकृतिः समत्वं सिमत्वं चेति । अतो न प्रकृतेरन्तोदात्तत्वं सर्वानुदात्तत्वं च 'फिषोऽन्त उदात्तः' 'त्वत् त्व समसिम इत्याद्यनेकसूत्राश्रयणं विहाय सम्भविष्यतीत्यावश्यकं फिट्सूत्रमिति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

फलेरुहाः
सुरूपा
पाकला
अपालङ्क
व्याघ्रिघात
आरेवत
आरग्वध
अस्वार्थः
भाता
सागरः
समुद्रः
गेहम्
अस्त्रियां किम्?
शाला
गुदम्
अस्त्रियां किम्?
आन्त्रेभ्यस्ते गुदाभ्यः
अन्तर्धा
छाया
माया
जाया
स्त्रीति किम्?
वाह्यम्
विषयग्रहणं किम्?

इभ्या
क्षत्रिया
नखम्
(१)उखा
सुखम्
दुःखम्
अश्मादेः किम्?
शिखा
मुखम्
अतिशयेन बहुलो बंहिष्ठः
वंहिष्ठैरश्वैः सुवृत्तारथेन
यद्वंहिष्ठं नातिविधे
परिवत्सरः
सप्ततिः
अशीतिः
चत्वारिंशत्
अस्यूर्णवानाप्रभृथस्यायोः
दक्षिणो बाहुः
आख्याग्रहणं किम्?
प्रत्यङ्मुखस्यासीनस्यवामपाणि-
र्दक्षिणोभवति
दक्षिणः
कृष्णानां व्रीहीणाम्

(१) खान्तस्य=खशब्दस्यान्तोदात्तो भवति। श् च म् श्मौ श्मा वादी यस्य स श्मादिर्नश्मादिरश्मादिस्तस्य शकारमकारादिरहितस्य 'उखा' इत्यादिप्रयोगस्य साधुत्वं प्रसिद्धम्॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कृष्णो नोनाव वृषभः	श्रविष्ठा
कृष्णो रात्र्यैः	धनिष्ठा
अयं वां कृष्णो अश्विना	कृत्तिका नक्षत्रम्
कृष्ण ऋषिः	आर्यिका
(१)सरो गौरो यथापिब	बहुलिका
अङ्गुष्ठम्	घृतं मिमिक्षे
पृष्ठम्	ज्येष्ठ आह चमसा
इन्द्र आशाभ्यस्परि	कनिष्ठ आह चतुरः
आश्लेषा	वयसिकिम् ?
अनुराधा	ज्येष्ठः
ज्येष्ठा	श्रेष्ठः
	कनिष्ठोऽल्पिकः

इतिफिट्स्वरप्रक्रियाप्रथमपादस्वरप्रयोगः ॥ ४ ॥

२ अथफिट्स्वरप्रक्रियाद्वितीयपादस्वरप्रयोगाः ॥ ५ ॥

(२)वलिः	सर्पिः
तनुः	कुशाः
(३)वने न वायः	काशा

(१) शुक्ल गौरयोर्नित्यमादिरुदात्तस्तु केचित् । केचित्तु वैकल्पिकेनेति । उदात्तत्वेप्राप्तेऽन्तोदात्तार्थे समारम्भे सूत्रे वशाग्रहणं नियमार्थं छन्दसि विधानात् लोके तु 'आद्युदात्तता'स्वयमेव सिद्धा' इत्येवात्रविवेकः । शमिति ।

इति फिट्सूत्रीयप्रथमपाद स्वरप्रक्रियासाधनप्रकारः ॥ १ ॥

२ अथफिट्सूत्रीयद्वितीयपादस्वरप्रक्रियासाधनप्रकारः॥२॥

(२) अथातः 'शकटेः' सूत्रस्य प्राग्–आदिरुदात्ताधिकारो भवति ।

(३) नपुंसकस्य नप् संज्ञावर्तते । इसन्तभिन्नस्य नित्यनपुंसकस्यादिरुदात्तो भवति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

माषाः
तिला
गोधूमाः
पञ्च
चत्वारः
(१)कर्णाभ्यां चिबुकादधि
ओष्ठाविव मधु
विश्वो विहायाः
काकः
वृकः
शुकेषु मे
प्राणिनां किम् ?
क्षीरं सर्पिर्मधूदकम्
कन्दुकः
वरुणं वो रिशादसम्
रथसारं त्वा कृणवै
पीवानं मेषम्
पतः
हरिणः
शितिः
पृश्निः
हरित
मुनिः
अक्षस्याहदेवनस्थ
तस्य नाक्षः
अक्षै मा दीव्यः
अर्धोग्रामस्य
समेऽशके तु अर्धविपल्याः
पीतद्रुः
सरलः
ग्रामः
सोमः
यामः
चञ्चेव चञ्चा
ताल इव तालः
मेरुरिव मेरुः
व्याघ्रः
सिंहः
महिषः
आङ्कः
अङ्गाः
(२)कल्याणः

(१) सर्वनाम्नः शिट् संज्ञावर्तते । अत्र च स्वाङ्गवाचिनामदन्तानां शिटां सर्वनाम्नामादिरुदात्तो भवति ।

(२) लघावन्ते 'इत्यत्र नादिसम्बन्धस्तेनानादेरपि गुरोरुदात्तः' । अत एव 'वृषाकप्यग्नि' इति सूत्रेवृत्यादिग्रन्थे च वृषाकपिशब्दस्य गुरुरुदात्त इति प्रसिद्धम् । न च गुरूणांमध्ये य 'आदिरित्यर्थोऽस्त्विति वाच्यम्' 'अन्यतोङीष्' इति सूत्रदर्शितस्थले 'सारङ्ग-कल्माष'शब्दौ 'लघावन्ते' इत्यादिना मध्योदात्तौ-इति हरदत्तग्रन्थविरोधादिति विवेकः । बह्वषः=बह्वचकस्य । इति ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कोलाहलः	कृकलासः
मल्लिका	श्यामाकाः
वर्णः	राजमाषाः
श्येनी	केकयः
हरिणी	पललम्
ऋक्षुपूर्वाः	शललम्
तरक्षुः	ह्यादीनां किम्?
कुक्कुटः	एकलः
तित्तिरिः	असंयुक्तेति किम्?
खञ्जरीटः	मल्लः
वसन्तः	(१)कृषिः

इति फिट्स्वरप्रक्रियाद्वितीयपादस्वरप्रयोगाः ॥ ५ ॥

३ अथफिट्स्वरप्रक्रियातृतीयपादस्वरप्रयोगाः ॥ ६ ॥

(२)ललाटम्	मकरः
कपोलम्	शीतन्या
रसना	शतपुष्पा
वदनम्	पादपः
मलयः	आतपः

(१) इगन्तानां द्व्यषामित्यत्र द्व्यचामिगन्तानामिति बोधः। अत्र चोदहारणं जनपदानामनुवर्तनात् 'कुरवश्चेदय इति' कृषिस्तु प्रत्युदाहरणमिति। 'अक्षैर्मादीव्यः कृषिमित् कृषस्व' इति वैदिक प्रयोगे कृषिशब्दस्यान्तोदात्तदर्शनात् ॥ इतिशम्।

इति फिट्सूत्रीयद्वितीयपादस्वरप्रक्रियासाधनप्रकारः ॥ २ ॥

३ अथ फिट्सूत्रीयतृतीयपादस्वरप्रक्रियासाधनप्रकारः॥६॥

(२) अत्र च 'अथ द्वितीयं प्रागीषात्' इति इषान्तस्य हलादेः—इत्यतः प्राग् द्वितीयोदात्ताधिकारः। मकर वरूढेत्यतः प्राग् त्र्यचां द्वितीयमुदात्तं भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनूपम्
नीपम्
अयुतम्
धमनिः
विपणिः
मकरः
वरूढः
सुगन्धि तेजनाः
राजादनफलम्
सनाथा सभा
हलीषा
(१)लाङ्गलीषा
(२)महिषी जाया
(३)अषाढा उपदधाति

इतिफिट्स्वरप्रक्रियातृतीयपादस्वरप्रयोगाः ॥ ६ ॥

४ अथफिट्स्वरप्रक्रियाचतुर्थपादस्वरप्रयोगाः ॥ ७ ॥

(४)शकटिः
शकटी
गोष्ठजो ब्राह्मणः
गोष्ठजः पशुः
पारावतः
धूम्रजानुः
मुञ्जकेशः
कालवालः
स्थालीपाकः
कपिकेशः

(१) देवरग्रहणमपि चिन्त्यप्रयोजनम्—'लघावन्ते' इत्यनेनैवसिद्धे हृदयग्रहणं द्वियीयस्योदात्तत्वबाधितुम्—अन्येषामुक्तप्रकारेण प्राप्ते वचनमिदं पठितमिति शम् ।

(२) नन्वत्र 'महिषी जाया' इति 'महिष्यषाढयोर्जायेष्टकाख्याचेत्' इति शास्त्रेणाद्युदात्तत्वे 'महिषीजाया' इत्याद्युदात्तविशिष्टं प्रसिद्धं रूपम् ।

(३) नन्वत्र 'अषाढा उपदधाति' इति पूर्वोक्तसूत्रावसरेण यथासंख्यवशादाद्युदात्तत्वे 'अषाढा उपदधाति' इति रूपमाद्युदात्तविशिष्टं सिद्धम् ।

इति फिट्सूत्रीयतृतीयपादस्वरप्रक्रियासाधनप्रकारः ॥ ६ ॥

४ अथफिट्सूत्रीयचतुर्थपादस्वरप्रक्रियासाधनप्रकारः ॥ ७ ॥

(४) नन्वत्र 'शकटिः' 'शकटी' इति शब्दयोः साधुत्वावसरे 'शकटिशकट्योरक्षरमक्षरं पर्यायेण' इति शास्त्रेण पर्यायेणोदात्तत्वे कदाचित् शकाराकारस्य कदाचित् ककाराकारस्य कदाचित् टकारेकारस्योदात्तत्वे रूपमिष्टं प्रसिद्धम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हरिकेशः	एव
न्यंङ्कुत्तानः	एवम्
वर्ञ्चवदयत्स्वः	नूनम्
तिल्यम्	सह
नना विल्वउदतिष्ठत्	सह ते पुत्र सूरिभिः
(१)स्तरीरुत्वत्	तन्नेमिमृभवो यथा
उतत्वः पश्यन्	पादान्ते किम् ?
नभन्ता मन्यके समे	यथानो अदितिः करत्
सिमस्मै	(२)पटुपटुः
तेन वासस्तनुते सिमस्मै	(३)प्रप्रायम्
स्वाहा	(४)दिवेदिवे

इतिफिट्स्वरप्रक्रियाचतुर्थपादस्वरप्रयोगाः ॥ ७ ॥

---

(१) ननु 'स्तरीरुत्वत्' इत्याद्यत्र 'त्वत्त्वसमसिमेत्युचानि' इति शास्त्रेण अत्र-त्यानि सर्वाणि सर्वानुदात्तानि भवन्ति। केवलं सिम शब्दस्याथर्वणेवेदे–उदात्तत्वं सम्भवति।

(२) ननु 'पटुपटुः' इत्यत्रपरस्यानुदात्तत्वे सिद्धं रूपम्। ननु 'कर्मधारयवदु-त्तरेषु' इत्यनेन कर्मधारयवद् भावादेव समासस्य इति सूत्रेणान्तोदात्तत्वंभवेदेव कथ मिदमुक्तं सूत्रमितिवाच्यम्। तस्य तु पाणिनीयात्पूर्वमेव प्रकृतत्वेन दोषविरहात्।

(३) ननु 'प्रप्रायम्' इत्यत्र 'शेषं सर्वमनुदात्तम्' इत्यनेन स्वप्रकारादिद्वि-त्वात्—अन्यस्मिन् द्वित्वे च सति परं सर्वमनुदात्तं भवति।

(४) अस्य प्रकारस्तु ३७ पृष्टे द्रष्टव्य इति शम्।

इति फिट्सूत्रीयचतुर्थपादस्वरप्रक्रियासाधनप्रकारः ॥ ७ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ स्वरप्रक्रियाप्रत्ययस्वरप्रयोगाः ॥ ८ ॥

(१)अग्निः
(२)कर्तव्यम्
यज्ञस्य
न यो युच्छति
नभन्ता अन्यके समे
यके सरस्वतीमनु
त्वकाम्युते
कौशायनाः
यदाग्नेयः
निशोथावः सवितुः
वाचा विरूपः
सौ किम् ?
राज्ञो नुते
एकाचः किम् ?
विद्युते राजनि त्वे
तृतीयादिः किम् ?
न ददर्श वाचम्
परम वाचा
इन्द्रो दधीचः
प्रतीचो बाहून्
प्रष्ठौहः
प्रष्ठौहा
अक्षद्युवा
अक्षद्युवे
इदम्
(३)एभिर्नभि नृतमः

(१) ननु 'अग्निः' इत्यत्र 'अङ्गेर्निर्नलोपश्च' इत्यनेन व्युत्पत्तिपक्षे नि प्रत्यये न लोपे 'आद्युदात्तश्च' इत्यनेन प्रत्ययस्याद्युदात्तत्वे 'अग्निः' इति सस्वरसिद्धं रूपं प्रसिद्धम् ।

(२) ननु 'कर्तव्यम्' इत्यत्र तु तव्यप्रत्यये प्रकृतसूत्रसत्वे रूपमिष्टं प्रसिद्धम् । परञ्च तित्वात्स्वरे तित्वमेव । न च तव्यस्याप्युदात्तत्वेसिद्धे 'उदात्तादनुदात्तस्यस्वरितः' इत्यनेन स्वरितस्वरे भवेचेत्–युक्तम्–किन्तु नायं सिद्धः तित्स्वरस्तु सिद्ध एवेति प्रवृत्यप्रवृत्तिभ्यामधिको विशेषः । यथोद्देशप्रवृत्तौ शेषनिघातपरिभाषायाः ज्ञापकं तव्यतस्तित्वमेवेति बोध्यम् ।

(३) नन्वत्रान्तोदात्तादित्यनुवृत्तेरन्वादेशे न स स्वरः । नच तत्र–अन्तोदात्ततास्तीतिवाच्यम्, 'इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ' इति शास्त्रेणानुदात्तस्याशो विधानात् । अतएवात्र 'सावेकाचः' इत्याद्यपि स्वरो न स्यात् । स्याचेत्तर्हिह–अन्तोदात्ताधिकारस्य व्यर्थता स्यात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्र ते॑ ब॒भ्रू
सास्यां गा अनु॑
पद्भ्यां भूमिः॑
द॒द्भि र्न जि॒ह्वा
अह॑रहर्जा॑यते मा॒सि मा॑सि
मन॑श्चिन्मे हृ॒द आ
अ॒पां फेने॑न
अभ्रा॒तेव॑ पुं॒सः
रा॒या व॒यम्
रा॒ये॑ध॒र्ता वि॒वस्व॑तः
उप॑त्वाग्ने दि॒वेदि॑वे
(१)अ॒ष्टाभि॒र्द॑शभिः
अच्छा॒रवं॑ प्रथ॒मा जा॑न॒ती
काण्वते
अन्तोदात्तात् किम् ?
दधती
अनुमः किम ?
तु॒दन्ती
चो॒द॒यि॒त्रि सू॒नृता॑नाम्
ए॒षां ने॒त्री
ऋ॒तं दे॒वाय॑ कृण्व॒ते स॑वि॒त्रे
ब्रह्मबन्ध्वा
से॒त्पृश्नि॑: सु॒भ्वे॑
यो अ॑द्रि॒मां उ॑दनि॒मां इय॑र्ति
अ॒क्षण्वन्तः कर्ण॑वन्तः सखा॑यः
अन्तोदात्तात् किम् ?
मात्वा॑ वि॒ददि॑षुमान्
म॒रुत्वां॑ इन्द्रः
नि॒युत्वा॑न्वा य॒वा॑गहि
रे॒वां इन्द्रे॒वतः॑
चे॒त॑न्ती सुम॒तीनाम्
दे॒व॒से॒ना॒ना॑मभिभञ्ज॒ती॒नाम्
जय॑न्तीनां म॒रुतो॑ य॒न्तु
आष॒डुभिर्हू॒यमा॑नः

(१) ननु 'अष्टाभिर्दशभिः' इत्यत्र 'अष्टनो दीर्घात्' इत्यनेन शसादिविभक्तिदर्शनात् भिसः–उदात्तत्वं सिद्धयति। अर्थस्तु–दीर्घान्तादष्टनः परासर्वनामस्थानविभक्तिरुदात्तेति। अत्रचाष्टनशब्दे प्राप्तं 'झल्युपोत्तमम्' इत्यपवाद्य घृतादित्वादन्तोदात्तत्वं स्यात्। एतेनोत्तरार्थमनुवर्तनार्हस्य च 'अन्तोदात्तात्' इत्यस्यापि न प्रकृतसम्बन्धः। प्रकृतसूत्रदीर्घग्रहणात् 'झल्युपोत्तमम्' इत्यनेनैव 'अष्टभिः' इत्यत्र स्वरःसिद्धः। नन्वत्रापि 'अष्टन आ विभक्तौ' इत्यनेनैवेष्टसिद्धौ विकल्पस्य च तद्विधावभावादिति चेत्, युक्तम्–इहस्थमेवदीर्घग्रहणमात्वविकल्पमष्टनो ज्ञापयति। नो चेद्दीर्घग्रहणमेव व्यर्थं स्यात्। ज्ञापयति च कृतात्वनिर्देशस्य षट्संज्ञाम्। अन्यथा सावकाशोह्यात्वपक्षेऽष्टनः स्वरः परत्वात्तत्पक्षे षट्स्वरेणैव बाधिष्यते–इति किं तर्हि दीर्घग्रहणेनेति शम्॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१)त्रिभिष्ट्वं देव
गवां शता
गोभ्यो गातुम्
शुनश्चिच्छेपम्
तेभ्यो द्युम्नम्
तेषां पाहि श्रुधीहवम्
द्युभिरक्तुभिः
झलिति किम् ?
उपत्वाग्ने दिवेदिवे
नृभिर्यमानः
कर्तूनम्
कर्ता
कर्तारौ
कर्तारः
य आस्ते
अभिचष्टे अनृतेभिः
पुरुभुजा चनस्यतम्
वर्धमानं स्वेदमे
तास्यादिभ्यः किम् ?
अभिवृधे गृणीतः
हतोवृत्राण्यार्या
लग्रहणं किम् ?
कतीह निघ्नानाः
सर्वधातुकं किम् ?
शिश्ये
अन्हिङोः किम् ?
हुते
यदधीते
इन्धेराजा
यासिष्टंवर्तिरश्विनौ
(२)लुलविथ
यदा हवनीये

इति स्वरप्रक्रियास्थप्रत्ययस्वरप्रयोगाः ॥ ८ ॥

---

(१) ननु "त्रिभिष्ट्वं देव" इत्यत्र 'षट्त्रिचतुर्भ्योहलादिः' इत्यनेन त्रिशब्दाद्धलादिविभक्तेरुदात्तत्वे भिसोरुदात्तत्वं सिद्धयति । नात्र सूत्रे 'अन्तोदात्तात्' इत्यस्यानुवृत्तिः । अनुवृत्तौ पञ्चानां नवानां चतुर्णामित्यत्र न स्यात् । 'त्रःसंख्यायाः' इत्याद्युदात्तत्वात् । नो तर्हि क स्यात्, सप्तानामष्टानाम् । अत्र च सप्ताष्टशब्दौ घृतादित्वादेवान्तोदात्ताविति विवेकः ।

(२) ननु 'लुलविथ' इत्यत्र चत्वारोऽपि वर्णा पर्यायेणोदात्ता वर्तन्ते । 'थलिच सेटीडन्तो वा' इति शास्त्रमाहात्म्यात् । यद्येते त्रयो न स्यात्तदा 'लिति' इत्यनेन प्रत्ययात्पूर्वमेवोदात्तत्वे समिष्टहानिः स्यात् । नन्वत्र च 'णमुलन्यतरस्याम्' इति शास्त्रत

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ स्वरप्रक्रियास्थ समासस्वरप्रयोगाः ॥ ९ ॥

(१)यज्ञश्रियम्	अयज्ञो वा एषः
सत्यश्रिन्नश्रवस्तमः	परिगणनं किम् ?
उदात्तेत्यादि किम् ?	स्नात्वा कालकः
समपादः	मुहूर्तसुखम्
तुल्यश्वेतः	भोज्योष्णम्
किरिणाकाणः किरिकाणः	कृष्णसारङ्गः
एतयन्मन्दयत्सखम्	लोहितकल्माषः
शस्त्रीश्यामा	वर्णः किम् ?

एवान्यतरस्यामित्यनुवर्तनेनैव सिद्धमिष्टं स्यात् । किमर्थं वा ग्रहणम् ? वा ग्रहणं कार्यिविकल्पसम्पत्तयेह्यस्ति । अन्यतरस्यां ग्रहणसामर्थ्यात् कार्यविकल्पस्य सिद्धत्वात् । तेनेडादौ कार्यं पर्यायेण स्यात् । ननु 'तवै चान्तश्च युगपत्' इत्यादिस्थले युगपत्ग्रहणात् पर्यायस्त्वन्यत्रापिसिद्धः । युक्तम्—आदरेऽपि वाग्रहणं प्राप्त्यर्थं क्रियते नो चेत् श्रुतयोरिडन्तयोरेवकार्यित्वं विकल्पेत । सेटिग्रहणं किमर्थमित्यत्र यथा थलिस्वरः स्यात् । ननु—इड्ग्रहणात् सेडेव थलो ग्रहणम् । इतिचेत्—श्रूयताम्—यदा इडागमः क्रियते तदा तस्योदात्तार्थं मिड्ग्रहणं तु स्यात् । यथा सः 'कर्तुं व्यंङ्सलोपश्च' इत्यत्र । ततोऽपि—यथा 'लुलविथ' इत्यत्रस्थले पर्यायेण चतुर्णांमुदात्तविधाने 'ययिथ' इत्यत्र चतुर्थोऽभावेऽप्युदात्तत्रयं पर्यायेण भवति तथा—इडभावेऽपि स्यादिति तात्पर्यम् ॥ शमिति ॥

इति स्वरप्रक्रियाप्रत्ययस्वरसाधनप्रकारः ॥ ८ ॥

समासस्वरसाधनप्रकारः ॥ ९ ॥

(१) नन्वत्र 'समासस्य' इति सामर्थ्यादन्तोदात्तत्वं सर्वत्र स्यात् परञ्चतत्तच्छास्त्रबलादन्योऽपिस्वरो भवति । अत्रच यज्ञस्य श्रियमिति विग्रहे षष्ठीतत्पुरुषेण समासे श्रीशब्दस्याद्युदात्तत्वे कृते सत्यान्तरतम्यादियङुदात्तो भवतीति सिद्धं रूपम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परम कृष्णः
वर्णेषु किम्
कृष्णतिलाः
अनेते किम् ?
कृष्णैतः
अरित्रगाधमुदकम्
गोलवणम्
प्रमाणे किम् ?
परमगाधम्
धनदायादः
दायाद्ये किम् ?
परमदायादः
(१)गमनच्चिरम्
व्याहरणकृच्छ्रम्
प्रतिबन्धि किम् ?
मूत्रकृच्छ्रम्
मूत्र पदेन प्रस्थितः
उच्चारपदेन प्रस्थितः
अपदेशे किम् !
विष्णु पदम्

कुटीनिवातम्
कुड्यनिवातम्
वातत्राणे किम् ?
राजनिवासे वसति
आर्तवम्
रज्जुशारदमुदकम्
अनार्तवे किम् ?
उत्तमशारदम्
कठाध्वर्युः
दौवारिककषायम्
जातौ किम् ?
परमाध्वर्युः
पितृशदृशः
सादृश्ये किम् ?
परमशदृशः
प्राच्यसप्तसमः
द्विगौ किम् ?
व्रीहिप्रस्थः
प्रमाणं किम् ?
(२)परमसप्तसमम्

---

(१) ननु कार्यसिद्धिं प्रतिबध्नाति· यत्तदित्यावश्यके णिनिप्रत्ययः । अत्रच गमन, व्याहरणशब्दौ ल्युडन्तौ लित्वात् 'लितीत्युभयोर्लित्स्वरः । अत्रत्योहि विशेषणसमासः नचात्र समानाधिकारणाभावे कथं तादृशः समासः ? गमन शब्दस्य गतिवाचित्वाच्चिरशब्दस्यकालवाचित्वात् । नात्रैष दोषः । अत्र चिरकालवाचिनि- गमने चिरशब्दोऽस्त्येव गमनमेव विशेष्यम् । तद्विशेषणे तु चिरकृच्छ्रे सति तन्त्र विशेष्यस्य पूर्वनिपातार्थं मयूरव्यंसकादित्वमपि विचार्यमिति पूर्वपदस्यप्रतिबन्धिवाचित्वमेव दर्शयितीति शम् ।

(२) ननु 'परमसप्तसमम्' इत्यत्र प्रमाणग्रहणाभावे स्व इस्यास्यासाधुत्वम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मद्रवाणिजः	दमू॒ना गृ॒हप॑ति॒र्दमे॑
गोवाणिजः	भूपतिः
गन्तव्येति किम् ?	वाक्पतिः
परमवाणिजः	चित्पतिः
भिक्षामात्रम्	दिधिषूपतिः
पाणिन्युपज्ञं ग्रन्थम्	भुवनपतिः
नन्दोपक्रमम्	गमनाशङ्क्यमस्ति
इषुच्छायम्	गमनबाधम्
नपुंसके किम् ?	गमननेदीयः
कुड्यच्छाया	संभावने किम् ?
गमनप्रियम्	परमनेदीयः
गमनसुखम्	आढ्यपूर्वः
(१)हिते किम् ?	भूतपूर्वे किम् ?
परमसुखम्	परमपूर्वः
(२)ब्राह्मणसुखं पायसम्	मद्रसविधम्
छात्रप्रियोऽनध्यायः	गान्धारसनीडम्
प्रीतौ किम् ?	काश्मीरसमर्यादम्
राजसुखम्	मद्रसवेशम्
गोस्वामी	मद्रसदेशम्
स्वं किम् ?	सामीप्ये किम् ?
परमस्वामी	समर्यादं क्षेत्रम्

सति प्रमाणग्रहणे सप्तानां समानां समाहार सप्तसममिति समाहारे द्विगौ पात्रादित्वात् स्त्रीत्वाभावे नपुंसकमिति विवेकः ।

(१) 'हिते किम्' इति प्रश्ने 'परमसुखमित्यादि सिद्धर्थम् । अन्यथा तत्पुरुषेऽत्रापि पूर्वपदप्रकृतिस्वरत्वं स्यात् ।

(२) ननु 'ब्राह्मणसुखं पायसमिति' स्थलेऽपत्येऽर्थेऽणिप्रत्ययस्वरेणान्तोदात्त इति विवेकः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चैत्रसमर्यादम्
विष्पष्टकटुकम्
विष्पष्टेति किम् ?
परमलवणम्
गुणेति किम् ?
विष्पष्टब्राह्मणः
विष्पष्ट
विचित्र
व्यक्त
संपन्न
पण्डित
कुशल
चपल
निपुण
गमनश्रेष्ठम्
गमनज्यायः
गमनावमम्
गमनकनिष्ठम्
गमनपापिष्ठम्
श्रेत्यादि किम् ?
गमनशोभनम्
भावे किम् ?
गमनश्रेयः
केति किम् ?
कुमारश्रवणा
प्रत्येनाः
कुमारप्रत्येनाः
कुमारचातकाः

कुमारजीमूताः
पञ्चारत्निः
दशमास्यः
पञ्चमास्यः
पञ्चकपालः
पञ्चभगालः
पञ्चशरावः
इगन्तादिषु किम् ?
पञ्चाश्वः
द्विगौ किम् ?
परमारत्निः
बह्वरत्निः
बहुमास्यः
बहुकपालः
पञ्चदिष्टिः
पञ्चवितस्तिः
शाङ्कास्यसिद्धः
आतपशुष्कः
भ्राष्ट्रपक्वः
चक्रबन्धः
अकालात्किम् ?
पूर्वाह्णसिद्धः
परित्रिगर्तं वृष्टो देवः
प्रतिपूर्वाह्णम्
प्रत्यपररात्रम्
उपपूर्वरात्रम्
अपत्रिगर्तम्
वर्ज्येति किम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यग्नि	महाव्रीहिः
श्वाफल्कचैत्रकाः	महापराह्णः
शिनिवासुदेवाः	महागृष्टिः
राजन्येति किम् ?	महेष्वासः
द्वैप्यभैमायनाः	महाहैलिहिलः
अन्धक वृष्णय एते	महतो व्रीहिर्महद्व्रीहिः;
बहुवचनं किम् ?	क्षुल्लकवैश्वदेवम्
संकर्षणवासुदेवौ	महावैश्वदेवम्
द्वन्द्वे किम् ?	उष्ट्रसादी
वृष्णिकुमाराः	उष्ट्रवामी
अन्धकवृष्णिषु किम् ?	गोसादः
कुरुपञ्चालाः	गोसादी
एकादश	गोसारथिः
द्वादश	कुरुगार्हपतम्
त्रयोदश	वृजिगार्हपतम्
(१)पाणिनीयरौढियाः	रिक्तगुरुः
पाणिनीयदेवदत्तौ	असूतजरती
आचार्येति किम् ?	अश्लीलदृढरूपा
छान्दसवैयाकरणाः	श्लीलम्
अन्तेवासी किम् ?	पारेवडवा
आपिशलपाणिनीयेशास्त्रे	तैतिलकद्रूः
कार्तकौजपौ	पण्यकम्बलः
सावर्णिमाण्डूकेयौ	पणितव्ये कम्बले

(१) अत्र च आचार्य उपसर्जनं यस्य स आचार्योपसर्जनः, अन्ते वसतीत्यन्तेवासी 'शयवासवासिष्वकालात्' इति सप्तम्यामलुकि षष्ठ्यर्थे च सूत्रे प्रथमा। 'पाणिनीयरौढीया' इत्यत्र वृद्धाच्छप्रत्यये रौढी शब्दाच्च 'इतश्च' इत्यनेनाण् 'नद्व्यचः'-इत्यादिनिषेधसामर्थ्यात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दासीभारः
देवहूतीः
स रा॒ये स पुर॑न्ध्या॑म्
यूपदारुः
गोहितम्
श्रेणिकृताः
पूगकृताः
कर्मधारये किम् ?
श्रेणिकृतम्
अनिष्ठा किम्?
कृताऽकृतम्
कष्टश्रितः
ग्रामगतः
अहीने किम् ?
कान्तारातीतः
सुखप्राप्तः
त्वोतासः
रुद्रहतः
महाराजहतः
कर्मणि किम् ?
रथयातः
पुरोहितम्
अनन्तरः किम्?
अभ्युद्धृतः
दूरादागतः
अग्ने॑, रा॒यो नृ॒तम॑स्य॒ प्रभू॑तौ
सङ्ग॑तिं॒ गोः
तादौ किम्?

प्रजल्पाकः
मिति किम् ?
प्रकृतौ
अतौ किम्?
आगन्तुः
अन्वे॑तं॑वा॒ उ॑
ये प॑रा॒ञ्चस्तान्
अलिगन्त इति किम् ?
प्र॒त्यञ्चो॑ यन्तु
ज॒हि॒नृष्ण्या॑नि कृणु॒हीप॑रा॑चः
वप्रत्यये किम् ?
उदञ्चनम्
न्यङ्ङुत्तानः
अध्यङ्
ईषत्कडारः
द्विःसुवर्णधनम्
हिरण्यं किम् ?
प्रस्थधनम्
परिमाणं किम् ?
काञ्चनधनम्
धनेतिकिम् ?
निष्कमाला
प्रथमवैयाकरणः
अचिरेति किम् ?
प्रथमो वैयाकरणः
कतरकठः
आर्यकुमारः
ब्राह्मणकुमारः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आर्यः किम् ?
परमब्राह्मणः
ब्राह्मणादीनि किम् ?
आर्यक्षत्रियः
राजब्राह्मणः
राजकुमारः
राजप्रत्येनाः
षष्ठीति किम् ?
अन्यत्र न
नित्यप्रहसितः
नित्यार्थे किम् ?
मुहूर्तप्रहसितः
ग्रामनापितः
ग्रामः किम्
परमनापितः
शिल्पिनि किम् ?
ग्रामरथ्याः
राजनापितः
राजकुशलाः
प्रशंसायां किम् ?
राजनापितः
शिल्पिनि किम् ?
राजहस्ती
मुकुटे कार्षापणम्
हले द्विपदिका
याज्ञिकाश्वः
वैयाकरणहस्ती
धर्म्येति किम् ?

स्तम्बेरमः
अहरणे किम् ?
वाडवप्रहरणम्
वाडवहार्यम्
गोवल्लवः
गवाध्यक्षः
पापनापितः
भार्यासौश्रुतः
अन्तेवासी
कुमारीदाक्षाः
ओदनपाणिनीयाः
भिक्षामाणवः
भयब्राह्मणः
गोत्रादिषु किम् ?
दासीश्रोत्रियः
क्षेपे किम् ?
परमब्राह्मणः
मधुमैरेयः
मध्वङ्गम्
अङ्गानि किम् ?
परम मैरेयः
मैरेये किम् ?
पुष्पासवः
भिक्षाकंसः
भाजीकंसः
भक्ताख्याः किम् ?
समाशशालयः
तदर्थेषु किम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भिक्षाप्रियः
धान्यगवः
गोबिडालः
तृणसिंहः
सक्तुसैन्धवः
उपमाने किम् ?
परमसिंहः
दन्तलेखः
अके किम् ?
रमणीयकर्ता
जीविकार्थे किम् ?
इक्षुभक्षिकां मे धारयसि
उद्दालकपुष्पभञ्जिका
प्राच्यां किम् ?
जीवपुत्रप्रचायिका
क्रियायां किम् ?
तवपुष्पप्रचायिका
छत्रधारः
नियुक्ते किम् ?
काण्डलावः
तन्तुवायः
शिल्पिनि किम् ?
काण्डलावः
अकृञः किम् ?
कुम्भकारः
तन्तुवायोनाम कृमिः
रथकारो नाम ब्राह्मणः
गोपालः

तन्तिपालः
यवपालः
गो इति किम् ?
वत्सपालः
पाले इति किम् ?
गोरक्षः
पुष्पहारी
उष्ट्रक्रोशी
ध्वाङ्क्षरावी
शब्दार्थप्रकृतौ किम् ?
वृकवञ्ची
प्रकृतिग्रहणं किम् ?
गर्दभोच्चारा
शुक्तारोही
आगतयोधी
क्षीरहोता
कुटीजः
काशजः
तुषजः
भ्राष्ट्रजः
वटजः
उपसरजः
आमलकीजः
बह्वचः किम् ?
दग्धजानि तृणानि
मल्लग्रामः
देवग्रामः
देवस्वामिकः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनिवसन्तः किम् ?
दाक्षिग्रामः
दाक्षिनिवासः
दाक्षिघोषः
दाक्षिकटः
दाक्षिह्रदः
छात्रिशाला
व्याडिशाला
छात्रिशालम्
इन्द्रप्रस्थः
अवृद्धं किम् ?
दाक्षिप्रस्थः
अकर्क्यादीनामिति किम् ?
कर्कीप्रस्थः
मकरीप्रस्थः
मालाप्रस्थः
शोणाप्रस्थः
ब्रह्मनगरम्
अमेति किम् ?
महानगरम्
नवनगरम्
अनुदीचां किम् ?
कार्तिकनगरम्
गुप्तार्मम्
कुक्कुटार्मम्
अवर्णं किम् ?
बृहदर्मम्
द्व्यच् त्र्यच् किम् ?

कपिञ्जलार्मम्
महार्मम्
नवार्मम्
भूतार्मम्
अधिकार्मम्
सञ्जीवार्मम्
मद्रार्मम्
अश्मार्मम्
मद्राश्मार्मम्
कज्जलार्मम्
दिवो दाशाय दाशुषे
सर्वश्वेतः
सर्वमहान्
सर्वं किम् ?
परमश्वेतः
गुणेति किम् ?
सर्वसौवर्णः
कार्त्स्न्ये किम् ?
सर्वश्वेतः
अञ्जना गिरिः
मौण्डिनिकायः
संज्ञायां किम् ?
ब्राह्मणनिकायः
वृद्धकुमारी
वयसि किम् ?
परमकुमारी
गुडोदकम्
अकेवले किम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शीतोदकम्
गर्गत्रिरात्रम्
द्विगौ किम् ?
अतिरात्रः
क्तौ किम् ?
बिल्वसप्तरात्रम्
गोपालसभम्
स्त्रीसभम्
सभायां किम् ?
ब्राह्मणसेनम्
नपुंसके किम् ?
राजसभा
रमणीयसभम्
ब्राह्मणकुलम्
देवदत्तपुरम्
नान्दीपुरम्
प्राचां किम्
शिवपुरम्
अरिष्टपुरम्
गौणपुरम्
पूर्वग्रहणं किम् ?
अरिष्टाश्रितपुरम्
गौडभृत्यपुरम्
हास्तिनपुरम्
फलकपुरम्
मार्देयपुरम्
कुशूलबिलम्
कूपबिलम्

कुम्भबिलम्
शालबिलम्
कुशूलादि किम् ?
सर्पबिलम्
बिलेति किम् ?
कुशूलस्वामी
पूर्वेषुकामशमी
अपरकृष्णमृत्तिका
पूर्वपञ्चालाः
पूर्वयायातम्
पूर्ववानराटम्
पूर्वपाणिनीयाः
आचार्येति किम् ?
पूर्वान्तेवासी
अन्तेवासिनि किम् ?
पूर्वपाणिनीयंशास्त्रम्
सर्वपाञ्चालकः
अपरपाञ्चालकः
अधिकारग्रहणं किम् ?
सर्वभासः
सर्वकारकः
विश्वकर्मा
विश्वदेवः
आविश्वदेवंसत्पतिम्
बहुव्रीहौ किम् ?
विश्वेदेवाः
संज्ञायां किम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विश्वदेवः
वृकोदरः
हर्यश्वः
महेषुः
घटोदरः
कटुकाश्वः
चलाचलेषु
गार्गीबन्धुः
नदी किम् ?
ब्रह्मबन्धुः
बन्धुनि किम् ?
गार्गीप्रियः
प्रधौतपादः
निष्ठा किम् ?
प्रसेवकमुखः
उपसर्गपूर्वं किम् ?
शुष्कमुखः
शुक्लकर्णः
शङ्कुकर्णः
कर्णः किम् ?
श्वेतपादः
वर्णलक्षणा त्किम् ?
शोभनकर्णः
मणिकर्णः
गोकर्णः
शितिकण्ठः
काण्डपृष्ठः
सुग्रीवः

नाडीजङ्घः
खरकण्ठः
गोपृष्ठः
अश्वग्रीवः
गोजङ्घः
उद्गतशृङ्गः
द्व्यङ्गुलशृङ्गः
ऋष्यशृङ्गः
मेषशृङ्गः
अवस्थे किम् ?
स्थूलशृङ्गः
अजरम्
अमरम्
अमित्रमर्दय
अवे देवेष्व मृतम्
तत्रः किम् ?
ब्राह्मणमित्रः
जेति किम् ?
अशत्रुः
सुकर्माणः सुयुजः
सनो वत्सदनिमानः सुब्रह्मा
शिवापशुभ्यः
सुमनाः सुवर्चाः
सुपेशसस्करति
सोः किम् ?
कृतकर्मा
मनसी किम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुराजा
अलोमोषसी किम् ?
सुलोमा
सुषाः
सुकर्मकः
सुस्रोतस्कः
साम्राज्याय सुक्रतुः
सुप्रतीकः
सुहव्यः
सुप्रतूर्तिमनेहसम्
अधास्वश्वाः
सुरथाँ आतिथिग्वे
आद्युदात्तं किम् ?
याशु बाहुः
द्व्यच् किम् ?
सुगुरसत्सु हिरण्यः
सुवीरेण रयिणा
सुवीर्यस्य गोमतः
उपकूलम्
उपतीरम्
उपमूलम्
उपशालम्
उपाक्षम्
सुषमम्
निःषमम्
कूलादिग्रहणं किम् ?
उपकुम्भम्

अव्ययीभावे किम् ?
परमकूलम्
द्विकंसः
द्विमन्थः
द्विशूर्पः
द्विपाय्यम्
द्विकाण्डम्
द्विगौ किम् ?
परमकंसः
ब्राह्मणशालम्
तत्पुरुषे किम् ?
दृढशालं ब्राह्मणकुलम्
शालायां किम् ?
ब्राह्मणसेनम्
नपुंसके किम् ?
ब्राह्मणशाला
सौशमिकन्थम्
आह्वरकन्थम्
नपुंसके किम् ?
दाक्षिकन्था
चिहणकन्थम्
मन्दुरकन्थम्
पुत्रचेलम्
नगरखेटम्
दधिकटुकम्
प्रजाकाण्डम्
गर्हायां किम् ?
परमचेलम्
वस्त्रचीरम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कम्बलचीरम्
उपमानं किम् ?
परमचीरम्
घृतपललम्
घृतसूपम्
घृतशाकम्
मिश्रे किम् ?
परमपललम्
दाक्षिकूलम्
शाण्डिसूदम्
दाण्डायनस्थलम्
दाक्षिकर्षः
संज्ञायां किम्
परमकूलम्
ब्राह्मणराज्यम्
अकेति किम् ?
परमराज्यम्
कुचेलम्
कुराज्यम्
अर्जुनवर्ग्यः
वासुदेवपक्ष्यः
परमवर्ग्यः
दाशकिपुत्रः
माहिषपुत्रः
पुत्रः किम् ?
कौनटिमातुलः
पुम्भ्यः किम् ?
दाक्षीपुत्रः

आचार्यपुत्रः
उपाध्यायपुत्र
शाकटायनपुत्रः
राजपुत्रः
ईश्वरपुत्रः
नन्दपुत्रः
ऋत्विक् पुत्र
याजकपुत्रः
होतुःपुत्रः
श्यालपुत्रः
ज्ञातिपुत्रः
भ्रातुःपुत्रः
मुद्गचूर्णम्
अप्रेति किम् ?
मत्स्यचूर्णम्
दर्भकाण्डम्
दर्भचीरम्
तिलपललम्
मुद्गसूपः
मूलकशाकम्
नदीकूलम्
षट् किम् ?
राजसूदः
अप्रेति किम् ?
दत्तकाण्डम
दर्भकुण्डम
वनं किम् ?
मृत्कुण्डम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कुम्भीभगालम्	प्रकारकः
कुम्भीनदालम्	प्रहरणम्
कुम्भीकपालम्	शोणाधृष्णुनृवाहसा
शितिपादः	इध्मप्रव्रश्चनः
शित्यंसः	उच्चैः कार
शितेः किम् ?	ईषत्करः
दर्शनीयपादः	गतीति किम् ?
अभस त्किम् ?	देवस्यकारकः
शितिभसत्	देवकारकः
	(१)(कृद्ग्रहणम्)

(१) ननु कृद्ग्रहणं विष्पष्टार्थमित्यत्र 'गतिकारकोपपदात्कृत्' इति सूत्रे कृद्ग्रहणं किमर्थम् ? प्रकारकः, प्रहरणमित्यादिसिद्ध्यर्थम् । गति, कारक, उपपदात्, एभ्यः कृत् कृदन्तं प्रकृतिस्वरं स्यात् तत्पुरुषसमासे । कर्मलक्षणाभावे तथा सति देवदत्तः कारकमेव स्यात् । समासप्रतिषेधश्च 'तृजकाभ्यां कर्तरि' इति स्यात् । तर्हि किमर्थं कृद्ग्रणम् । यथा निर्गतः कौशाम्ब्यातिष्कौशाम्बिरित्यत्र माभूत् । न तथाऽस्ति यत्क्रियायुक्ताः प्रादयस्तंप्रत्येवगत्युपसर्गसंज्ञा भवन्ति । न च क्रियायोगः कौशम्बी-शब्दंप्रति, क्रियायाश्चैवकारकं सम्भवति । उपपदमपि सप्तमीनिर्दिष्टं धात्वधिकारे प्रत्ययनिमित्तमुच्यते । गत्यादिभिरपि क्रियावाच्युत्तरपदंतदेवमाक्षिप्यते । क्रियावाचित्वं धातोश्च सम्भवति । कृत, तिङ्, इति तस्माद्द्वयेप्रत्ययाः भवन्ति । एवञ्च तिङन्तेन समासाभावात् कृदन्तमेव सम्भवति । अनुव्यचलदित्यादौ तु गतिनिबन्धन, समासो न किन्तु 'सुप' इतियोगविभागात् समासोभवति । तस्मात्किमर्थंकिद्ग्रहणमिति प्रश्ने ? विष्पष्टार्थमिति असमर्थं प्रति विष्पष्टार्थम् ।

ननु विष्पष्टार्थमपि कृद्ग्रहणे क्रियमाणेन प्राप्नोत्यामन्ते प्रपचतितरामिति, ततश्च समासस्वरं बाधित्वाऽव्ययस्वर एव स्यात् । मूले तु प्रपचतितरामित्यत्र तरबाद्यन्तेन समासे कृते आम्, तत्र तु सति शिष्टस्वरबलीयस्त्वम्, सतिशिष्टत्वादामस्वरोभवतीत्येके । अन्ये तु प्रपचतिदेश्यार्थंकृद्ग्रहणमिति । आदिशब्देनप्रपचतिकल्पं, प्रपचतिदेशीयः, प्रपचतिरूपमित्येषां ग्रहणं भवति। यत्र सति शिष्टं स्वरान्तरं न प्राप्नोति तत्रापि स्वरो मा भूत्, अव्ययपूर्वपदप्रकृतिस्वर एव यथास्यात् तदर्थमित्याहुः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वनस्पति वन आ
बृहस्पतिं यः
हर्षया शचीपतिम्
तनूनपादुच्यते
नराशंसं वाजिनम्
शुनः शेपम्
आयइन्द्रावरुणौ
इन्द्राबृहस्पती वयम्
देवता किम् ?
प्लक्षन्यग्रोधौ
द्वन्द्वे किम् ?
अग्निष्टोमः
इन्द्राग्निभ्यां कं वृषणः
अपृथिव्यादौ किम् ?
द्यावापृथिवीजनयन्
सोमारुद्रौ
इन्द्रापूषणौ
शुक्रामन्थिनौ
प्रभृथस्यायोः
आवसथः
प्रसेदः
धर्ता वज्रीपुरुष्टुतः
प्रत्तयः
प्रलवः
प्रलवित्रम्
गोवृषः
सुस्तुतं भवता
ऋतस्य योनौ सुकृतस्य-
शशप्लुतः
उपहूतः शाकल्यः
परिजग्धः कौण्डिन्यः
अनेति किम् ?
आचितम्
आस्थापितम्
प्रवृद्धः
प्रयुक्तः

इदमाह तु हरदत्त महोदयः। इदं तु वक्तव्यम्। प्रपचतितरामित्यादौ तरबन्तेनसमासे कृते पश्चादाम् भवन् प्रत्ययग्रहणपरिभाषया पचतितरस्यैव घान्तत्वात् तत एवस्यात्। तत्र को दोषः। सोपसर्गस्य घान्तस्य–एक पद्याभावादाम्। प्रपचितितरां देवदत्तेत्यादौ 'आम एकान्तरमामन्त्रितमनन्तिके' इत्येषविधिर्नस्यात् शेषनिघातश्चप्रशब्दस्य न स्यात्, भिन्नपदत्वात्। तस्मात् प्र शब्दस्य–आमन्तेन समासोऽङ्गीकर्तव्यो- न तरबन्तेन तत्र समासत्वात् समुदायस्य प्रातिपदिकत्वे विभक्तौ–एकपद्यं भवति। स्वरे तु दोषप्रसङ्गात् कृद्ग्रहणमपि त्यक्तव्यमिति भाष्ये समुल्लिखितम्। एवं सति प्रपचतिदेश्यादौ कादशा–इति जानन्तु धीराः। शमिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१) देवदत्तः
(२) विष्णुश्रुतः
कारकात्किम् ?
(३) संभूतो रामायणः
दत्तश्रुतयोः किम् ?
देवपालितः
(४) एव किम् ?
कारकादपि
संश्रुतः
(५) आशिषि किम् ?
देवखाता
सुप्तप्रलपितम्

(१) 'देवदत्तः' इत्यत्र "कारकादत्तश्रुतयोरेवाशिषि" संज्ञायामाशिषि कारकात्परयोर्दत्तश्रुतयोरेव क्तान्तयोरन्त उदात्तः स्यात्तत्पुरुषे । 'संज्ञायामनचितादीनाम्' इत्यन्तोदात्तनियमनवलात् । उक्तसूक्तार्थकरणेनान्तोदात्तत्वे, देवा एनं देयासुरित्येवं-देवैर्दत्तो देवदत्तः 'आशिषि लिङ्लोटौ' इति सूत्रबलात् वर्तमाने 'क्तिच्क्तौ च संज्ञायाम्' इति क्तप्रत्यये 'दोदद्धोः' इत्यनेन दथादेशे 'देवदत्तः' सिद्धः प्रयोगः ।

(२) ननु 'विष्णुना श्रुतः इत्यत्र विष्णुरेनं श्रूयादित्येवं प्रार्थिते सति विष्णुना श्रुतो पूर्ववदेवात्रापि क्तप्रत्यये 'विष्णुश्रुतः' इति सिद्धम् ।

(३) 'संभूतं रामायणम्' इत्यत्र संपूर्वकस्य भूधातोः'क्तिच्क्तौ च' इत्याशिषि क्तप्रत्यये 'संज्ञायामनाचितादोनाम्' इत्यन्तोदात्तत्वे संभूतशब्दः । संभूतमिति रामायणस्य नाम । कारकग्रहणाभावे 'गतिकारकोपपदात्' इति सूत्रत्रितयाधिकारलाभात् यथैव कारकान्नियमोऽस्ति तथैव गतेरपि स्यादेव । एवंसति संभूतं रामायणमित्यनाशिषि सावकाशं 'संज्ञायामनाचितादीनाम्' इति सूत्रमाशिषि न स्यात्, किन्तु गतिरनन्तर एव स्यादतोकारकादित्यावश्यकमिति ॥

(४) ननु एव किमिति प्रश्ने कारकावधारणं यथा स्याद्दत्तश्रुतावधारणं माभूद् अकारकादपि दत्तश्रुतयोरन्त उदात्तो भवति । सिद्धेऽधिकारे आरभ्यमाणोऽन्तरेणाप्येवकारं नियमार्थो भविष्यति ? असति ह्येवकारे नियमस्य विपरीतताऽपि स्यात् । कारकादेवदत्तश्रुतयोरिति, एवंसति कारकाद्दत्तश्रुतयोर्न स्यात् । इष्टञ्च मन्मते । कारकस्य अनियतत्वाद् देवपालित इत्यादौ अन्तोदात्तो भवति । अतः कारकावधारणं यथा स्यात्, माभूद् दत्तश्रुतावधारणमित्येदर्थमेवकारग्रहणं 'संगतम्' इतिशम् ॥

(५) ननु आशिषि किमिति आशिष्येव नियमस्येष्टत्वाद् 'देवैःखाता देवखाता' इत्यत्र 'तृतीयाकर्मणि' इतिपूर्वपदप्रकृतिस्वरः । तेनानाहतो नदति देवदत्त इत्यत्र-न भवति । शङ्खविशेषस्य देवदत्तनाम । इति शम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रमत्तगीतम्
पयः पानंसुखम्
राजभोजनाः शालयः
अनः किम् ?
हस्तादायः
सेति किम्
दन्तधावनम्
द्वारकात्किम् ?
निदर्शनम्
रथवर्त्म
पाणिनिकृतिः
छन्दोव्याख्यानम्
राजशयनम्
राजासनम्
अश्वस्थानम्
ब्राह्मणयाजकः
गोक्रीतः
कारकात्किम्
प्रभूतौ सङ्गतिम्
अध्ययनपुण्यम्
सप्तम्याः किम् ?
वेदपुण्यम्
माषोनम्
माषविकलम्
वाक्कलहः
धान्यार्थः
तिलमिश्राः
सर्पिःमिश्राः

मिश्रं किम् ?
गुडधानाः
अनुपसर्गं किम् ?
तिलसंमिश्राः
असन्धौ किम् ?
ब्राह्मणमिश्रो राजा
अकार्णवेष्ट कि कम्
अच्छादिकः
अवत्सीयः
असांतापिकः
नञः किम् ?
विगार्दभरथिकः
गुणप्रतिषेधे किम् ?
अगार्दभरथिकः
सूपेति किम् ?
अपाणिनीयः
तद्धिताः किम् ?
अवोढा
अपाश्या
अदन्त्यम्
अतदर्थे किम् ?
आपाद्यम्
तद्धितः किम् ?
अदेयम्
गुणःप्रतिषेधे किम् ?
दन्त्यादन्यददन्त्यम्
अवामदेव्यम्
अपचः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पक्तुमशक्तः
अशक्तौ किम् ?
अपचोदीक्षितः
अन्योऽयंपचादपचः
अपक्वोजाल्मः
अविक्षिपः
अदेवदत्तः
अकर्तव्यः
अनागामुकः
अनलङ्करिष्णुः
अनाढ्यविष्णुः
अचारुः
असाधुः
अराजा
अनहः
अकर्ता
अनन्नम् ?
अतीक्षामम्
इदंप्रथमा
एवंद्वितीयः
तत्पञ्चमः
बहुव्रीहौ किम् ?
अनेन प्रथम इदंप्रमथः
इदमेतत्तद्भ्यः किम् ?
यत्प्रथमः
प्रथमपूरणयोः किम् ?
तद्बहुः
क्रियागणने किम् ?
इदंप्रथमाः
गणने किम् ?
इदंप्रथमाः
इदंप्रथमकाः
द्विस्ताना
चतुस्ताना
संख्या किम् ?
दर्शनीयस्तना
स्तनः किम् ?
द्विशिरा
द्विस्तनीं करोति वामदेवः
चतुस्तनां करोति द्यावापृथिव्योर्दोहनाय ।
देवमित्रः
कृष्णाजिनम्
संज्ञायां किम् ?
प्रियमित्रः
विश्वामित्र ऋषिः
वस्त्रान्तरः
व्यवधायिनः किम् ?
आत्मान्तरः
गौरमुखः
स्वाङ्गं किम् ?
दीर्घमुखाशाला
उच्चैर्मुखः
प्राङ्मुखः
गोमुखः
महामुखः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्थूलमुखः
मुष्टिमुखः
पृथुमुखः
वत्समुखः
प्रक्षालितमुखः
सिंहमुखः
सारङ्गजग्धः
मासजातः
दुःखजातः
जातिकालेति किम् ?
पुत्रजातः
अनाच्छादनात्किम् ?
वस्त्रच्छन्नः
अकृतेति किम् ?
कुण्डकृतः
कुण्डमितः
कुण्डप्रतिपन्नः
दन्तजातः
मासजातः
अव्रीहिः
सुमाषकः
अब्रह्मबन्धुकः
सुकुमारिकः
अव्रीहिकः
सुमाषकः
अब्रकः
बहुव्रीहिकः
बहुमित्रकः

उत्तरपदेति किम् ?
बहुमानः
बहुगुणारज्जुः
बह्वक्षरंपदम्
बह्वध्यायः
अवयवाः किम् ?
बहुगुणो द्विजः
प्रपृष्ठः
प्रललाटः
उपसर्गात्किम् ?
दर्शनीयपृष्ठः
स्वाङ्गं किम् ?
प्रशाखो वृक्षः
ध्रुवं किम् ?
उद्बाहुः
अपर्शु किम् ?
विपर्शुः
तस्येदिमे प्रवणे
अन्तर्वणो देशः
पर्यन्तः
समन्तः
न्यन्तः
व्यन्तः
परिकूलम्
परिमण्डलम्
प्रगृहम्
अस्वाङ्गं किम् ?
प्रपदम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निरुपदम्
निरुपलम्
अभिमुखम्
अभिमुखा शाला
अपमुखम्
अपस्फिगम्
अपपूतम्
अपवीणम्
अपाङ्गः
अपाध्वम्
अपकुक्षि
अपसीरम्
अपहलम्
अपनाम
अधिदन्तः
उपरिस्थं किम् ?
अधिकरणम्
अनुज्येष्ठः
अनुकनीयान्
अप्रेति किम् ?
अनुज्येष्ठः
अनुपुरुषः
अन्वादिष्टः किम् ?
अनुपुरुषः
अत्यङ्कुशो नागः
अतिपदा गायत्री
अकृत्पदे किम् ?
अतिकारकः

अतिगार्ग्यः
अतिकारुकः
निर्मूलम्
न्यक्षम्
अनिधाने किम् ?
निदण्डः
प्रत्यंशुः
प्रतिजनः
प्रतिराजा
उपदेवः
उपेन्द्रः
उपाजिनम्
अगौरादयः किम् ?
उपगौरः
उपतैषः
तत्पुरुषे किम् ?
उपसोमः
सुप्रत्यवसितः
सोः किम् ?
कुब्राह्मणः
अक्षेपणे किम् ?
सुवृषणम्
उत्पुच्छः
तत्पुरुषे किम् ?
उत्पुच्छः
द्विपाच्चतुष्पाच्च रथाय
त्रिपादूर्ध्वः
द्विदन्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्रिमूर्धानं सप्तरश्मिम्
(१)द्विमूर्धः
त्रिमूर्धः
द्वित्रिभ्यां किम् ?
कल्याणमूर्धा
बहुव्रीहौ किम् ?
द्विमूर्धा
गौरसक्थः
श्लक्ष्णसक्थः
आक्रान्तात्किम् ?
चक्रसक्थः
अजिसक्थमालभेत
परादिश्चपरान्तश्च
पूर्वान्तश्चापि दृश्यते ।
पूर्वादयश्च दृश्यन्ते
व्यत्ययो बहुलं ततः । वार्तिकमिति ॥
तुविजाता उरुक्षया
नियेन मुष्टिहत्यया
यष्ट्रिंचक्रः
(२)विश्वायुर्धेहि

इतिस्वरप्रक्रियास्थसमासस्वरप्रयोगाः । ४ ।

---

(१) ननु 'मूर्धन्' इत्यकृतसमासान्त एव मूर्धशब्दः । किमर्थमेतादृशमिति, तस्यैतत्प्रयोजनमसत्यपि समासान्ते—अन्तोदात्तत्वं यथा स्यात्। एतदेव ज्ञापकमनित्यः समासान्तो भवतीति । यद्यकृतसमासान्तस्योपादानम् , तर्हि यदा समासान्तःक्रियते तदा न प्राप्नोति, कुतः ? शब्दान्तरत्वात् । बहुव्रीहिकार्यत्वात्, तस्य बहुव्रीहिरेकादेशः समासान्तस्तस्य भावस्तस्मात् । 'तदेवं बहुव्रीहिकार्यत्वात्तदेकदेशित्वेनाश्रयणात् समासान्तस्येति यदा समासान्तः क्रियते तदापि विधिरयं भवत्येवेति शम् ॥

(२) ननु पूर्वान्ते 'विश्वायुर्धेहि' इत्यत्र विश्वम्—आयुर्यस्मिन्निति बहुव्रीहिः विग्रहः अत्र च कन् प्रत्ययान्तो हि विश्वशब्दः पूर्वप्रकृतिस्वरेणाद्युदात्ते प्राप्ते बाहुलकात् समाधेयमितिशम् ॥

इति समासस्वरामृताव्याख्या ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथस्वरप्रक्रियास्थतिङन्तस्वरप्रयोगाः ॥१०॥

पचति गोत्रम्	अवचक्षण-स्वाध्यायेत्यादयः
पचति पचति गोत्रम्	गोत्रादीनि किम् ?
एवं ब्रुव-प्रवचन-प्रहसन-	पचति पापम्
प्रकथन-प्रत्ययन-	(१)कुत्सेति किम्?
प्रचक्षण-प्राय-	खनति गोत्रं समेत्य कूपम्
स्वाय-विचक्षण-	(२)अग्निमीळे

(१) ननु कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम्। तेनान्यत्रापि गोत्रादिग्रहणे कुत्सनादावेव कार्यं ज्ञेयम्। अत्रायं विचारः–ननु कुत्सनाभीक्ष्ण्यग्रहणंगोत्रादीनां पाठविशेषणम्, एतयोरर्थयोर्गोत्रादीनि भवन्ति, तानि च तिङः पराण्यनुदात्तानि भवन्ति किम् ? आहोस्विदनुदात्तविशेषणं तिङः पराणि गोत्रादीन्यनुदात्तानि भवन्त्येतयोरर्थयोरिति । कश्चात्र निर्णयः कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणमिति । योगविभागादेवायश्चार्थो लभ्यते 'तिङोगोत्रादीनि' इत्येको योगोऽनुदात्तविधानार्थः, 'कुत्सनाभीक्ष्ण्ययोः' इति द्वितीयो योगः, गोत्रादीनि, इत्येव। इयं परिभाषा शास्त्रेऽस्मिन् कुत्सनाभीक्ष्ण्यविषयाण्येव ग्राह्याणि । तेन किं फलं भवतीति ? तेनान्यत्रापि गोत्रादिग्रहणे कुत्सनादावेव कार्यं ज्ञेयम् ।

अन्यत्रापि शब्दध्वनेः । चनचिदिवेत्यादिस्थलेविचार्यमिति ।
ननु यद्यदार्थे च हेतौ विचारे यदि चेच्चणः ॥
हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ।
क्वचित् प्रश्ने नेत् निषेधे, प्रशंसायां कुविस्मृतम् ॥ इतिशम् ॥

(२) ननु 'तिङ्ङतिङ' इति सूत्रे अनुदात्तं सर्वमित्यनुवृत्तं सर्वानुदात्तो निघातो-भवतीति वैयाकरणानां व्यवहारः । अत्र चातिङ्ग्रहणं किमर्थमिति प्रश्ने ? पचति भवतीत्युत्तरमेककर्तृकापचिक्रिया भवतीति तात्पर्यम् । ननु, अतिङ्ग्रहणं व्यर्थम्, समानवाक्ये निघातयुस्मदस्मदादेशा इति प्रमाणनिर्देशात्, तथा च कस्मिन् वाक्ये तिङन्तद्वयाभावादिति चेत्तर्हि सूत्रकारेण समानवाक्याधिकारो न विहित इत्यतिङ्ग्रहणं कृतम् । भाष्यकारमहोदयैस्तु प्रत्याख्यातमेवातिङ्ग्रहणम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्वः कर्ता
(१)यदग्ने स्यामहं त्वम्
युवा यदाकृथः
कुविदङ्ग आसन्
अचित्तिभिश्चकृमा कच्चित्
पुत्रासो यत्र पितरो भवन्ति
नह भोक्ष्यसे
नहाध्येष्यसे
प्रत्यारम्भे किम् ?
नहवैतस्मिंल्लोके दक्षिणमिच्छन्ति
सत्यं भोक्ष्यसे
प्रश्ने किम् ?
सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम
अङ्ग कुरु
(२)अप्रातिलोम्ये किम् ?

अङ्ग कूजसि वृषल इदानीं ज्ञास्यसि जाल्म ।
आ हि ष्मा याति
आहि रुहतम्
अनृतं हि मत्तो वदति
पाप्मा चैनं पुनाति
यथा चित् कण्वमावतम्
यावत् पचति शोभनम्
यथा पचति शोभनम्
पूजायां किम् ?
यावद्भुङ्क्ते
अनन्तरं किम् ?
यावद्देवदत्तः पचति शोभनम्
यावत् प्रपचति शोभनम्
यावद्देवदत्तः प्रपचति शोभनम्

---

(१) ननु यदग्नेस्यामहंत्वमित्यत्र 'अस्'धातोर्लिङ्यडि रूपनिष्पन्ने प्राप्तनिघाते यद्योगे 'निपातैर्यद्यदिहन्त' इत्यादिसूत्रेण निषेधे निघातान्निवृत्तिः ॥

(२) अप्रातिलोम्ये किमिति प्रश्ने ? 'अङ्ग कूजसि वृषल इदानीं ज्ञास्यसि जाल्म' इति किमत्राप्रातिलोम्यं प्रतिकूलकारित्वं हि प्रातिलोम्यं ततोऽप्यन्यदभिमतकारित्वमप्रातिलोम्यम् । तथासति—आनुलोम्य इति वक्तव्यम्, 'अङ्ग कुरु' इत्यत्र कृधातोर्लोण्मध्यमपुरुषैकवचने सिपि 'सेर्ह्यपिच्च' इति ह्यादेशे 'तनादिकृञ्भ्यः' इति सूत्रेणोत्वे 'सार्वधातुकार्धधातुकयोः' इति धातोर्गुणे 'अतउत्सार्वधातुके' इत्युदादेशे 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हेर्लुकि प्रकृतसूत्रबलात् 'कुरु' इति उप्रत्ययस्वरेणान्तोदात्तत्वे प्रत्युदाहरणे सिद्धम् । अत्र च—अनभिप्रेतमसौ कुर्वन् प्रतिलोमो भवतीति 'अङ्ग कूजसि वृषल इदानीं ज्ञास्यसि जाल्म' इति प्रत्युदाहृतम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१)आदह्स्वधामनु पुनर्गर्भत्वमेनिरे
अहो देवदत्तः पचति शोभनम्
(२)अहो कटं करिष्यति
अधीष्व माणवक पुरा विद्योतते
विद्युत् ।
परीक्षायां किम् ?
न तेनस्म पुराधीयते
चिरातीतेऽत्रपुरा
ननु गच्छामि भोः
अन्विति किम् ?
अकार्षीः कटं त्वम्
ननु करोमि
किं द्विजःपचत्याहोस्विद्गच्छति
क्रियेति किम् ?

साधनप्रश्ने माभूत्
किं भक्तं पचत्यपूपान्वा
प्रश्ने किम् ?
किं पठति
अनुपसर्गं किम् ?
किं प्रपचति उत प्रकरोति
अप्रतिसिद्धं किम् ?
किं द्विजो न पचति
देवदत्तः पचत्याहोस्वित्पठति
एहि मन्ये भक्तं भोक्ष्यसे नहि भोक्ष्यसे भुक्तं तत्वतिथिभिः
प्रहासे किम् ?
एहि मन्यसे ओदनं भोक्ष्यसे इति सुष्ठु मन्यसे ।

---

(१) आदहस्वधामनु पुनर्गर्भत्वमेनिरे—अत्र त्वित्यादीनि पूजाविषयाणि 'पूजायां नानन्तरम्' इति सूत्रात् पूजायामित्यनुवर्तमाने पूजाग्रहणं व्यर्थमिति, मैवं वाच्यम्, पूजाग्रहणन्तु निघातप्रतिषेधार्थम् । तथाहि पूजाग्रहणं प्रतिषेधेन सम्बद्धमतस्तदनुवृत्ताविहापि 'न लुट्' इत्यादिसूत्रप्रयोजनविषये प्रतिषेधस्य प्रतिषेधः स्यात् । मा भूदेवं निघातस्यैव यथा स्यादित्येतदर्थमेव पूजाग्रहणम् ॥

(२) पूर्वं तावत् 'अहो कटं करिष्यति' इत्यत्र 'शेषे विभाषा' इत्यस्य अहो— इत्यनेन युक्तं तिङन्तमपूजायां वानुदात्तमित्यर्थकरणे सिद्धौ पूर्वसूत्रे पूजायामित्युक्तत्वात् । ततोऽन्यः शेष इत्यपूजायामस्येतिप्रत्ययस्वरः सिद्धः । अत्र च नेयमपूजा किन्तु—अनाश्चर्यभूतमेव वस्तुजातमसूयया आश्चर्यवन्निष्पाद्यते । अत्र शेषग्रहणं स्पष्टार्थमेव प्रतिभाति । योगविभागसामर्थ्यादेव पूर्वप्रकृतिष्वननुवर्तनात्तत्र चानुकृष्टत्वादेव निवृत्तिरिति भावः ॥ प्रहासे किमिति प्रश्ने—एहि मन्यसे ओदनं भोक्ष्ये—इति सुष्ठु मन्यसे 'गत्यर्थलोडाल्लडित्यनेनैव सूत्रेण सिद्धेऽयं नियमार्थ इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एहि मन्यसे ओदनंभोक्ष्ये
जातु भोक्ष्यसे
अपूर्वं किम् ?
कटं जातु करिष्यसि
(१)कश्चिद्भुङ्क्ते
कतरश्चित्
कतमश्चित्
कतमश्चिद्वा
चिदुत्तरं किम् ?
को भुङ्क्ते
रामः किञ्चित् पठति
आहो उताहो वा भुङ्क्ते
अपूर्वेति किम् ?
देव आहो भुङ्क्ते
आहो देवः पचति
आगच्छ देव ग्रामं द्रक्ष्यसि
उह्यन्तां देवदत्तेन शालयः
रामेण भोक्ष्यन्ते
गत्यर्थ किम् ?
पच देव ओदनं भोक्ष्यसेऽन्नम्
लोटा किम् ?
आगच्छेदेव ग्रामं द्रक्ष्यस्येनम्

लृडिति किम् ?
आगच्छ देव ग्रामं पश्यस्येनम्
न चेदिति किम् ?
आगच्छदेव ग्रामं पिता ते ओदनं भोक्ष्यते
सर्वं किम् ?
आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्याव एनम्
आगच्छ देव ग्रामं पश्य
गत्यर्थ इति किम् ?
पच देवौदनं भुङ्क्ष्वैनम्
लोट् किम्
आगच्छ देवग्रामं पश्यसि
आगच्छ देव ग्रामं पश्यत्वेनं रामः
आगच्छ देव ग्रामं त्वं चाहं च पश्यावः ।
आगच्छ देव ग्रामं प्रविश
सोपसर्गं किम् ?
आगच्छ देव ग्रामं पश्य
अनुत्तमं किम् ?
आगच्छानि देव ग्रामं प्रविशानि
हन्त प्रविश

---

(१) ननु 'वृ'धातोरधिकरणे क्तप्रत्यये किमो वृत्तं किंवृत्तम् । 'अधिकरणवाचिनश्च' इति सूत्रेण षष्ठी । यद्यपि 'अधिकरणवाचिना च' इत्यनेन समासनिषधे प्राप्ते किंवृत्तमिति निपातनसामर्थ्यात् समासः । यदि च यत्र पदे किंशब्दो वर्तते तत्सर्वं गृह्यते, तदा किमीयः, कितरामित्यादौ दोषःस्यात् । अत एवात्र विभक्त्यन्तं डतरडतमान्तं किमो रूपं किंवृत्तमिति विवेकः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हन्त कुरु
अनुचमं किम् ?
हन्त प्रभुञ्जावहै
आम् पचसि देवदत्त ३
आमिति किम् ?
शाकं पचसि देवदत्त
एकान्तरमिति किम् ?
आ३अपचसि देवदत्त ?
आमन्त्रितमिति किम् ?
आ३पचति देवदत्तः
अनन्तिके किम् ?
आ३पचसि देवदत्त
(१)गवां गोत्रमुदसृजो यदङ्गिरः
इन्द्रो वामुशन्ति हि
आख्यास्यामि तु ते
जाये स्वारोहावैहि
देवः पचति चन
देवः पचति चित्
देवः पचतीव
देवः पचति गोत्रम्
देवः पचति कल्पम्
देवः पचति पचति
अगतेः किम् ?
देवः प्रपचति चन
देवः पचति च खादति च
देवः प्रपचति च प्रखादति च
गाश्च चारयति वीणां वा वादयति
इतो वा सातिं मीमहे
योगे किम् ?
भूतपूर्वयोर्यथा स्याच्छ्रुतम्
स्वयं ह रथेन याति ३ उपाध्या
पदातिं गमयति
त्वमह ग्रामं गच्छ त्वमहारण्यं गच्छ
स्वयमह रथेन याति३उपाध्या-
यं पदातिं नयति,
देव एवग्रामं गच्छतु देव एवारण्यं
गच्छतु,
देव एव ग्रामं गच्छतु राम एवा-
रण्यं गच्छतु,
अवधारणं किम् ?
देव केव मोदयसे
इन्द्र वाजयु नोऽव
शुक्ला व्रीहयो भवन्ति २
श्वेता गा आज्याय दुहन्ति
व्रीहिभिर्यजेत यवैर्यजेत
अहवै देवानामासीत्

(१) ननु यद्, हि, तु, शब्दपरयोगे तिङन्तमनुदात्तं न भवतीति सूत्रार्थः। परमत्र सूत्राभावेऽकार्यनिर्वाहो भविष्यति न वा ? कुतः—निपातैर्यदिति, हिचेति, तुपश्येति, च सूत्रत्रयेणैव लक्ष्यसिद्धिः, किमर्थमिति ? नियमार्थमिदमिति नियमाकारश्च—'एतैरेव परभूतैर्योगे नान्यैः' यद्यपि हन्तेत्यादिभिः सूत्रैर्योगे न स्यादिति विवेकः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रात्रिरसुराणामासीत्	अजामेका जिन्वति
बृहस्पतिर्वै देवानां पुरोहित आसीत	(१)प्रजामेका रक्षति
अयं वाव हस्त आसीत्	(२)तयोरन्यः पिप्पलं स्वाद्वत्ति

(१) 'प्रजामेकाजिन्वति'इत्यत्र 'अन्यां प्रीणयति' 'अन्यां रक्षति' इत्यर्थसिद्धिः । अत्र च तिङ्भिः प्रथमा विभक्तिर्नानुदात्ता भवतीति ।

(२) अत्र च-द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति ॥

ऋक्संहितायाम्-अ० २ अ० ३ वर्ग ॥ १७ ॥

अस्यार्थप्रकारः—

एकवृक्षस्थितयोर्जीवपरमात्मनोस्तादात्म्यसंवन्धेन कर्मफलप्रातिकथनम् । यथा किल ऋग्वेदे कथितम् । तत्र च द्वित्वविवक्षायां द्विशब्दस्य द्विवचनप्रयोगे छन्दसि दृष्टानुविधित्वाद् द्वा, इति, तथा च तथैव सुपर्णौ, इत्यत्र सुपर्णा, इति, सयुजौ इत्यत्र सयुजा, इति, सखायौ, इत्यत्र सखाया, इति, अत्रायमेव लौकिकवैदिकभेदश्च । समानम्, एकमेव वृक्षं पादपं परिषष्वजातेः समाश्रयतः, द्वा द्वौ, सुवर्णा किंशुकौ सुपतनौ सुन्दरगमनौ सयुजासहैकयोगौ एकसंवन्धौ सखाया समानप्रसिद्धौ, इति, उभौ जीवेश्वरावेकत्रैवाश्रयतः । तयोरन्य एको जीवः पीप्पलं पक्वं स्वादुभूतं कर्मफलमत्ति भुङ्क्ते । आकाङ्क्षाया अशान्तत्वात् । अपरः परमात्मस्वरूपः पिप्पलमनश्नन्नसमाप्तकामत्वेनाभुञ्जानः, अभिचाकशीति तटस्थेन—अभिपश्यति । कुतः स्पृहाया अभावात् । 'आप्तकामस्य का स्पृहा' इति स्मृतिदर्शनात् । नन्वेकस्य यादृशं ख्यानमपरस्य च तादृशञ्चेत्तदा भेदः स्फुटमेव प्रतिभाति, तर्हि कथं तादात्म्येन विवेकः । नात्र मतान्तरानुसरणमुभयोरेकख्यानमिति सखायौ भवतः । वास्तवभेदोऽपि निरस्तः । यथा, आश्रयान्तराभावात् तद्वत् सयुजा सखाया इति । वृश्च्यते, इति वृक्षो देहः स च—उभयोः समान एक एव ।

मानञ्च-समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्यमहिमानमिति वीतशोकः ॥१॥ अत्रायं विवेकः । जीवपरमात्मनोर्लौकिकपक्षिद्वयदृष्टान्तेन वास्तवस्वरूपं स्तुतमित्यपरं भवद्भिरपि विचार्यमिति शम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनश्नन्नन्यो अभिचाकशीति	दारुणमध्यापकः
समर्थाभ्यां किम् ?	यत्काष्ठं प्रपचति
(१)एको देवानुपातिष्ठत्	यत्काष्ठं शुक्लीकरोति
(२)यो भुङ्क्ते	पचतिपूति
यच्छङ् वायुर्वाति	प्रपचति पूति
(३)काष्ठाध्यापकः	पचति मिथ्या
दारुणाध्यापकः	प्रपचति मिथ्या
अज्ञाताध्यापकः	कुत्सने किम् ?

(१) 'एकोदेवानुपातिष्ठत्' इत्यत्रैकशब्दः संख्यापरम्, एकशब्दस्य अनेकार्थवाचित्वात् ।

मानञ्च—एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽल्पे संख्यायाञ्च प्रयुज्यते ॥ इति प्रमाणसाहचर्यादन्यार्थक एवैकशब्दः, तद्ग्रहणमिति चेद्युक्तम् । अत्र प्रकरणे साहचर्यं न व्यवस्थापकमिति शम् ।

(२) ननु यदो वृत्तं यद्वृत्तमिति समासे यत्र पदे यत्–शब्दो वर्तते तत्सर्वं यद्वृत्तम् । अत्र हि वृत्तग्रहणेन विभक्त्यन्तस्य प्रतीतिः । अत्र च नाश्रियते डतरडतमौ च प्रत्ययाविति । पञ्चमीनिर्देशे सति सामर्थ्याद्व्यवहिते कार्यमिष्यते ।

(३) काष्ठाध्यापक इत्यत्र, पूजनात् पूजितमिति सूत्रेणानुदात्तं भवति । इदं च सूत्रं सुबन्तविषयकम्, उत्तरसूत्रे तिङ्ग्रहणात्, उदाहरणे समासश्चात्र मयूरव्यंसकादित्वादेव । काष्ठादयस्तु विचित्रपर्याया भवन्तः, पूजनवचनाः प्रतीयन्ते दारुणमध्यापक इति समासे कृते वृत्तिकारन्यासकारयोर्मते विभक्तेर्लुकि सति स्वाभाविकी मकारनिवृत्तिः । दारुणमध्यापक इति वृत्तिमतं हि यतः पूजनादित्येव पूजितग्रहणे सिद्धे पूजितग्रहणमनन्तरपूजितलाभार्थम् । एतदेव च ज्ञापकमत्र प्रकरणे 'पञ्चमीनिर्देशेऽपि आनन्तर्यमाश्रीयते' इति, भाष्यवार्तिककैयटकारास्तु, असमास एव क्रियाविशेषणीभूतानां दारुणमित्यादिशब्दानामसमास एवास्य प्रकृत सूत्रस्य प्रवृत्तिमिच्छन्ति । मयूरव्यंसकादित्वे तु प्रमाणाभाव एव । हरदत्तमतेऽपि यदि समास एवेदमभीष्टं तदा समासे कथन्न । नह्यत्र समासाधिकारोऽस्ति । पक्षेऽस्मिन् मलोपवचनं च सार्थकमिति शम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रपचति शोभनम्
सुपि किम् ?
पचति क्लिश्नाति
अगोत्रादौ किम् ?
पचति गोत्रम्
पचति पूतिर्देवदत्तः
पचति पूतिः
अभ्युद्धरति
गतिःकिम् ?
दत्तः प्रपचति
गतौ किम् ?
'आमन्द्रैरिन्द्रहरिभि र्या हि मयूर रोमभिः'
यत्प्रपचति
(१)उदात्तवति किम् ?
प्रपचति
प्रकरोति

इति स्वरप्रक्रियास्थ तिङन्तस्वरप्रयोगाः ॥ १० ॥

---

(१) ननु 'तिङि चोदात्तवति' इतिसूत्रे तिङ्ग्रहणं किमर्थम् । उदात्तवतः परिमाणार्थम् । अन्यथा हि यत्क्रियायुक्ताःप्रादयस्तंप्रत्येवगत्युपसर्गसंज्ञाविधानात् ॥

तिङ्ग्रहणाभावे धातोरेव क्रियावाचित्वाद् गतिसंज्ञानिमित्तमिति धातावेवोदात्तवति निघातः, प्रत्यये न स्यात् । कृते तु तिङ्ग्रहणे 'यं धातुं प्रतिगतित्वं तद्घटके तिङन्ते–उदात्तवति परे' इत्येवार्थो भवति । तेन तत्करोतीत्यादिलक्ष्ये धातोः शेषनिघातेन सत्यप्यनुदात्तत्वे तिङन्तस्य उप्रत्ययस्वरेण मध्योदात्तत्वाद् गतेरेव निघातो भवतीतिशम् ॥

॥ इत्यमृताख्यायां तिङन्तस्वरः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ वैदिकप्रक्रियावाक्येषु स्वरसञ्चारप्रकारप्रयोगाः॥ १॥

ॐ अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्। होता॑रं रत्न॒धात॑मम्॥ १॥

इत्याद्यत्रत्यं ऋक्संहितामन्त्रस्वरूपमिति।

(१) अ॒ग्निमी॑ळे | (२) पु॒रोहि॑तम्

अथ वैदिकवाक्यस्वरसञ्चाराऽमृताख्याप्रकारः।

(१) अथ च तावत् 'अग्नि नामकं यज्ञस्य पुरोहितं देवं होतारं ऋत्विजं देवं रत्नधातमं ईळे नौमि 'इड्' स्तुतौ धातुः। बह्वृचाध्येतृसंप्रदायप्राप्ते-अज्मध्यस्थडकारस्यलकारे सिद्धम्। अहमग्निदेवस्य स्तुतिंकरोमि, कीदृशमग्निं स्तौमि, इति यज्ञस्य पुरोहितं यथा यज्ञकर्तुर्यजमानस्य राज्ञः पुरोहितो यज्ञकार्यसंपादकस्तदभीष्टं सर्वं संपादयति, तथैवाग्निरपि यज्ञस्यापेक्षितं होमं संपादयति, पुनः कीदृशं देवं, दानादिगुणयुक्तं, पुनः कीदृशं होतार होतृकर्म कर्तारम्, ऋत्विजं उपहोतृकर्म कर्तारम्, पुनश्च कीदृशं रत्नधातमं यागफलरूपाणां रत्नानामतिशयेन धारयितारं पोषयितारमग्निनामकं देवम्, ईळे स्तौमि। 'अग्निर्मुखो प्रथमो देवतानामिति मन्त्रात्'। यज्ञस्य दाता दीपयिता द्योतयितायमग्निरित्यग्नेश्च होतृत्वं होमाधिकरणत्वेन द्रष्टव्यम्। रत्नशब्दो हि रमणीयत्वाद् रत्नत्वं दधाति, धातुश्च दानार्थवाचिरिति। अगिधातोर्गत्यर्थत्वात्, अङ्गेर्नलोपश्चेत्यौणादिकसूत्रेण निप्रत्ययये-इदित्वान्नुमागमेन प्राप्तस्य नकारस्य लोपेकृतेऽङ्गतिस्वर्गं गच्छतीत्यग्निस्तत्र धातोरिति सूत्रेणाकारस्योदात्तत्वे "आद्युदात्तश्चेति प्रत्ययस्येकारस्याप्युदात्तत्वे-उभयोरप्युदात्तयोः 'अनुदात्तं पदमेकवर्जमिति' सूत्रेणोदात्तमन्यतरमवशिष्यान्यस्यानुदात्तत्वे प्राप्ते "सति शिष्टस्वरो बलीयान्" इति जाते च न्यायनिर्णये प्रत्ययस्वरावशेष एव सिद्धः,"अनुदात्तौ सुप्पितौ" इत्येकवचनानुदात्तत्वे "अमि पूर्वः" इति पूर्वरूपे 'एकादेश उदात्तेनोदात्त' इत्युदात्तत्वे सिद्धः, यद्यपि यास्क-वैयाकरण-गार्ग्याणां मतभेदो भवति, तथापि गार्ग्यस्य मतेऽग्निशब्दस्याखण्डप्रातिपदिकत्वात् 'फिषोन्त उदात्तः" इत्यन्तोदात्त-एव। ईळ इति पदं सम्पूर्णमप्युदात्तम्। "तिङ्ङतिङः" इत्यतिङन्तादग्निशब्दात्परस्य ईळ इति तिङन्तस्य—निघात विधानात्।

(२) संहिताकाले त्वीकारस्य "उदात्तादनुदात्तस्य स्वरितः" इति स्वरितत्वे—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१)य॒ज्ञस्य॑	(४)होता॑रम्
(२)दे॒वम्	(५)रत्नधात॑मम्
(३)ऋ॒त्विज॑म्	

इतिश्रीवैदिकस्वरप्रक्रियाप्रयोगसूची सम्पूर्णेति शम् ॥ ११ ॥

तद्भाविन एकारस्य तिङ्प्रत्ययरूपस्य "स्वरितात्संहितायामनुदात्तानाम्" इति प्रचयनामकमेकश्रुत्यमस्ति। पुरशब्दोऽन्तोदात्तः "पूर्वाधरावराणामसिपुरधवश्चैषाम्" इति पूर्वशब्दादस्प्रत्यये पुरादेशे च प्रत्ययस्वरे, धाञो निष्ठायाम्, 'दधातेर्हिः' इति ह्यादेशे प्रत्ययस्वरेणान्तोदात्तत्वे हितशब्दः। तत्र च प्राप्ते समासान्तोदात्तत्वेऽपवादकत्वेन तत्पुरुषे तुल्यार्थेत्यादिनाऽव्ययपूर्वपद मित्यादिना पूर्वपदप्रकृतिस्वरत्वे सिद्धः।

अथवा पुरोऽव्ययमितिगतिसंज्ञात्वे गतिरनन्तर इति पूर्वपदप्रकृतिस्वरत्वे तत ओकारस्योदात्तत्वेऽवशिष्टानाञ्च स्वराणामनुदात्तस्वरितप्रचयाः पूर्ववदेव ज्ञातव्याः, आद्याक्षरस्य संहिताकाले प्रचयप्राप्तौ "उदात्त स्वरित परस्य सन्नतरः" इत्यतिनीचोऽनुदात्तस्वरः

(१) यज याचेत्यादिना यजतेः सतिनङ्प्रत्ययेऽन्तोदात्तो हि यज्ञशब्दः।

(२) विभक्तेः सुप्स्वरेण सत्यनुदात्तत्वे स्वरितत्वे च देवशब्दः पचाद्यजन्तः, स च फिट्स्वरेण, प्रत्यय स्वरेण, चित्स्वरेण, वान्तोदात्तः।

(३) ऋत्विक् शब्दश्च, ऋतौ यजतीति विग्रहे ऋत्विग्दधृगित्यादिना निपातिते रूपे गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वे पूर्ववदेव विभक्तिस्वरत्वे सिद्धः।

(४)होतृशब्दश्च तृन्प्रत्ययान्तः, नित्स्वरेणाद्युदात्तत्वे पूर्ववदेव स्वरितप्रचयौ भवतः।

(५) रत्नशब्दश्च 'नब्विषयस्यानिसन्तस्य' इत्याद्युदात्तत्वे, रत्नानि दधातीतिविग्रहे समासत्वादन्तोदात्तो हि रत्नधाशब्दः। कृदुत्तरपदप्रकृतिस्वरो वा, तमप्प्रत्ययस्य च पित्स्वरेणानुदात्तत्वे स्वरितप्रचयौ भवतः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्थं वैदिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
तदस्तु प्रीतये श्रीमद्भवानीविश्वनाथयोः ॥ १ ॥
शम्भुं पितामहं श्रीमद्यज्ञनारायणाभिधम् ।
शश्वन्नुमो गुरूंश्चैवं यत्कृपायाः फलं शुभम् ॥ १ ॥
प्रदर्शितं स्वरूपमत्र कौमुदीयलौकिकम् ।
प्रगृह्य मानमानिनः स्मृतेः सुखं वहन्त्वति ॥ २ ॥

इति श्रीमध्यपल्लीराजगुरुपण्डितश्रीराघवेन्द्रनारायणमिश्रात्मजपण्डितश्रीकेशवमिश्रशास्त्रिकृतवैदिकस्वरप्रक्रिया

प्रयोगसूची सम्पूर्णा ॥११॥

शमिति

संहितादशायां हि प्रथमाक्षरस्य प्रचयः, द्वितीयाक्षरस्य च सन्नतरत्वं सिद्धम् ।

अत्र मन्त्रे 'अग्निमीळे' इति प्रथमा ऋक् । तत्र च माधवमतेरव्युत्पत्तिपक्षे 'फिष' इत्यन्तोदात्तः । वस्तुतस्तु 'घृतादीनां च' इत्यनेन घृतादित्वादन्तोदात्तः । व्युत्पत्तिपक्षे तु 'ञ्नित्यादिर्नित्यम्' इति निप्रत्ययस्वरेणाद्युदात्तः । 'अम्' सुप्त्वात् 'अनुदात्तौ सुप्पितौ' इत्यनेनानुदात्तः, 'अमि पूर्वः' इत्यनेनैकादेशः 'एकादेश उदात्तेनोदात्तः' इत्यनेनोदात्तः, अतिङन्तात् । 'अग्नि' शब्दात् परे तिङन्तस्य ईळे शब्दस्य 'तिङतिङः' इत्यनेन निघातः । 'ईड स्तुतौ' धातोः लडुत्तमैकवचनम्, इट्, टेरेत्वम्, 'द्वयोश्चास्य स्वरयोः' इत्यादिना प्रातिशाख्येन डस्य ळत्वम् । सत्यपि धातुत्वाद्युदात्तत्वे संहिताविवक्षायां निघाते संहितायां तु 'उदात्तादनुदात्तस्य स्वरितः' इत्यनेनेकारः स्वरितः । 'स्वरितात् संहितायाम्' इति 'ळे' इत्यस्य प्रचयापरपर्याया एकश्रुतिः ।

पुरःशब्दस्त्वन्तोदात्तः पूर्वापराणामिति–असिप्रत्ययस्वरात् । हितशब्दोऽपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धाञो निष्ठायां 'दधातेर्हिः'इति 'ह्या'देशे प्रत्ययस्वरेणान्तोदात्तः यद्यपि 'पुरोऽव्ययम्' इति गतिसंज्ञायां 'कुगति च' इति समासे समासान्तोदात्तः 'तत्पुरुषे तुल्यार्थे'वेत्य व्ययपूर्वप्रदप्रकृतिस्वरे प्राप्ते 'गतिकारकोपपदात्कृत्' कृदुत्तरपदप्रकृतिस्वरे, थाथ दिस्वरे च, पूर्वपूर्वोपमर्देन प्राप्ते तथाऽपि 'गतिरनन्तरः' इति पूर्वपदप्रकृति भवति । पुरःशब्दस्योकारस्य संहितायां प्रचये प्राप्ते परमत्र 'उदात्तस्वरित सन्नतरः' इत्यनेनानुदात्ततरः ।

'यज्ञस्य' इत्यत्र 'यजयाच' इत्यादिना यजेर्नङ् नङः प्रत्ययस्वरः । षष्ठीविभक्तेः सुप्त्वादनुदात्तत्वे 'स्वरितो वाऽनुदात्ते पदादौ' इत्यनेन स्वरितत्वात् ।

"देवम्" इत्यत्र पचाद्यच् फिट्स्वरेण प्रत्ययस्वरेण चित्स्वरेण वाऽन्तोदात्तः । "ऋत्विजम्" इत्वत्र ऋतौ–उपपदे यजेःक्विन् ऋत्विग् इति 'वचिस्वपि' इत्यनेन संप्रसारणे ऋत्विक्छब्दः कृदुत्तरपदप्रकृतिस्वरेण–अन्तोदात्तः ।

"होतारम्" इत्यत्र होतृशब्दस्तृन्प्रत्ययान्तः–नित्स्वरेणाद्युदात्तः ।

"रत्नधातमम्" इत्यत्र रत्नशब्दे 'नब्विषयस्यानिसन्तस्य' इत्यनेनाद्युदात्तः । तथा च रत्नानि दधातीति रत्नधाः–इत्यत्र समासस्वरेण कृदुत्तरपदप्रकृतिस्वरेण वाऽन्तोदात्तः, ततस्तमपि तमपः पित्वादनुदात्तत्वे स्वरितप्रचयौ । इति मन्त्रांशस्वरसञ्चारप्रकारः । एवमेव सर्वत्र बुद्धिपूर्वकं तत्तच्छास्त्रेण साधनीयमिति शम् ॥ ११ ॥

वेदार्थस्य गाम्भीर्य्याद् बुद्धेश्चाविशेषाद्यथाऽवकाशेन च च्छात्रोपकाराय संक्षेणोदाहृतौ वेदमन्त्रार्थसाधनप्रकाराविति । अतः परं सुधिभिरेव विभाव्यमिति शम् ॥

इति श्रीमध्यपल्लीराजगुरुपण्डितश्रीराघवेन्द्रनारायणमिश्रात्मजपण्डितश्रीकेशवमिश्रशास्त्रिकृतवैदिकस्वरसञ्चाराऽमृताख्याव्याख्याप्रकारः सम्पूर्णः । इति शम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

* श्रीः *

अथ पाणिनीयशिक्षा ।

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा ।
शास्त्रानुपूर्व्यं तद्विद्याद्यथोक्तं लोकवेदयोः ॥ १ ॥
प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥ २ ॥
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥ ३ ॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥ ४ ॥
अनुस्वारो विसर्गश्च ᳵक ᳶपौ चापि पराश्रितौ ।
दुःस्पृष्टश्चेति विज्ञेयौ ऌकारः प्लुत एव च ॥ ५ ॥
आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ ६ ॥
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ।
प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम् ॥ ७ ॥
कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ ८ ॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥ ९ ॥
स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तन्निबोधत ॥ १० ॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥ ११ ॥
उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥ १२ ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥ १३ ॥
ओभावश्च विवृत्तिश्च शषसा रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ १४ ॥
यद्योभावप्रसन्धानमुकारादिपरं पदम् ।
स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥ १५ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम् ।
औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥ १६ ॥
कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ।
स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥ १७ ॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः ।
एऐ तु कण्ठतालव्या ओऔ कण्ठोष्ठजौ स्मृतौ ॥ १८ ॥
अर्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत् ।
ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥ १९ ॥
संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् ।
घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥ २० ॥
स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् ।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥ २१ ॥
अनुस्वारयमानां च नासिकास्थानमुच्यते ।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥ २२ ॥
अलाबुवीणानिर्घोषो दन्त्यमूल्यः स्वराननु ।
अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ॥ २३ ॥
अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये ।
द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रौकारवकारयोः ॥ २४ ॥
व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥ २५ ॥
यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते ।
एवं रङ्गाः प्रयोक्तव्याः खेअराँ इव खेदया ॥ २६ ॥
रङ्गवर्णं प्रयुञ्जीरन् नो ग्रसेत् पूर्वमक्षरम् ।
दीर्घस्वरं प्रयुञ्जीयात् पश्चान्नासिक्यमाचरेत् ॥ २७ ॥
हृदये चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि ।
नासिकायां तथाऽर्धं च रङ्गस्यैवं द्विमात्रता ॥ २८ ॥
हृदयादुत्करे तिष्ठन् कांस्येन समनुस्वरन् ।
मार्दवं च द्विमात्रं च जघन्वाँ २ इति निदर्शनम् ॥ २९ ॥
मध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ भवेत् ।
स रङ्गं कम्पयेत् कम्पं रथीवेति निदर्शनम् ॥ ३० ॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः ।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥ ३१ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ ३२ ॥
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ ३३ ॥
शङ्कितं भीतमुत्कृष्टमव्यक्तमनुनासिकम् ।
काकस्वरं शिरसि गतं तथा स्थानविवर्जितम् ॥ ३४ ॥
उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् ।
निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम् ॥ ३५ ॥
प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन ।
मध्यन्दिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन ॥ ३६ ॥
तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥ ३७ ॥
अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शरस्तथा ।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥ ३८ ॥
ञमोऽनुनासिका नह्रौ नादिनो हझषः स्मृताः ।
ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः ॥ ३९ ॥
ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते ।
दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि ॥ ४० ॥
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ ४१ ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ ४२ ॥ ८ ॥
उदात्तमाख्याति वृषोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्द्धा ।
उपान्तमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव ॥ ४३ ॥
उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोऽङ्गुलिम् ।
निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥ ४४ ॥
अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् ।
मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदात्तमिति नवपदशय्या ॥ ४५ ॥
अग्निः सोमः प्रवो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती ।
अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितम् ॥ ४६ ॥
हविषां मध्योदात्तं स्वरिति स्वरितम् ।
बृहस्पतिरिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम ॥ ४७ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः ।
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥ ४८ ॥ ९ ॥
चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः ।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥ ४९ ॥
कुतीर्थादागतं दग्धमपवर्णं च भक्षितम् ।
न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥ ५० ॥
सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ५१ ॥
मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ ५२ ॥
अनक्षरमनायुष्यं विस्वरं व्याधिपीडितम् ।
अक्षताः शस्त्ररूपेण वज्रं पतति मस्तके ॥ ५३ ॥
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ ५४ ॥
हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥ ५५ ॥
शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥ ५६ ॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ ५७ ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ ५८ ॥
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥ ५९ ॥
त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः ।
स भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समश्नुते दिवीति दिवीति ॥६०॥

अथ शिक्षामात्मोदात्तश्च हकारं स्वराणां यथा
गीत्यचोस्पृष्टोदात्तं चाषस्तु शङ्कर एकादश ।

इति पाणिनीयशिक्षा समाप्ता ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१९२७

व्याकरणशास्त्रिपरीक्षायाम् ।

१ खण्डे १ पत्रम् ।

सिद्धान्तकौमुदीस्वरवैदिकप्रक्रिययोः प्रश्नाः ।

१ अङ्गिरस्वत्, आघ्वं नो देवाः, विदामक्रन्, बर्हिष्येषु निधिषु, संवत्सरीणः, सोमः सधस्थम्, मरुतस्तज्जुजुष्टन, प्रप्रायमग्निः—एषु लौकिकरूपप्रदर्शनपूर्वकं वैदिकसाधनप्रकारं प्रदर्शयत । ... १६

२ द्रवत्पाणी शुभस्पती, ममचुनः, तित्तिरिः, अहरहर्जायते, इन्धे राजा—एषु ससूत्रनिर्देशं स्वरविशेषान् निरूपयत । ... ८

३ रज्जुशारदं, पण्यकम्बलः, तन्तुवायः, मत्स्यचूर्णमित्येषु समासस्वरविधायकसूत्रोल्लेखनपुरस्सरं स्वरान् निरूपयत । ... ८

४ जातु भोक्ष्यसे, आम् पचसि देवदत्ता ३, अयं वाव हस्तः, अधीष्व माणवक, पुरा विद्योतते विद्युत्—एषु वाच्यस्वरनिर्देशं स्वरविधायकानि लिखत । ८

५ व्यत्ययो बहुलम्, उत्तरपदवृद्धौ सर्वं च, विभाषोत्पुच्छे इति सूत्राणां विषयान् प्रदर्शयत । ... १०

१९२८

१ वाजिनेषु, मानआधक्, देवयज्यायै, विभाजं नाशकत्, अनुसखा सयूथ्यः, मधव्यः, आसुतिं करिष्ठः, ज्या इयम्, नूनं कृणुताद्, दविध्वतो रश्मयः सूर्यस्य, अग्ना३इ पत्नीवः ।

एषां मध्ये नवसु प्रयोगेषु यानि वैदिकप्रक्रियाकार्याणि तानि ससूत्रनिर्देशं स्वेच्छया लेख्यानि । ... १८

२ सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः, अभ्यस्तानामादिः, द्व्यचश्छन्दसि, सगतिरपि तिङ्—एषामर्था उदाहरणानि च लेख्यानि । ... १२

३ ऋत्विक्, हन्त प्रविश, जातु भोक्ष्यसे, त्रिपादूर्ध्वः, वस्त्रान्तरः, शचीपपातम्, काण्डपृष्ठः, तन्तुवायः त्वोतासः, न्यर्बुदम्, मातृका, गेहम्, दातवाउ ।

एषां मध्ये दशसु स्थलेषु ससूत्रनिर्देशं स्वरविशेषाः प्रदर्शनीयाः । ... २०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१९२९

१ सग्धिश्च मे, पूर्णा विवष्टि, वीरुधः पारयिष्णवः, गृभ्णामि ते, वायवे पिबध्यै, यस्येदमप्यं हविः, कथा ग्रामं न पृच्छसि, ते नो अवन्तु, त्मना देवेषु, दिवं सुपर्णो गत्वाय, वृका अघायवः, निषत्तमस्य चरतः, हरिवा-मेदिनं त्वा ।

एषां मध्ये नवसु प्रयोगेषु यानि वैदिकप्रक्रियाकार्याणि तानि सूत्र-निर्देशपुरःसरं लेख्यानि । ... १८

२ प्रकृत्यान्तः पादमव्यपरे, प्लुतावैच इदुतौ, स्वरितो वानुदात्ते पदादौ, उदात्तयणो हल्पूर्वात्—एषां सूत्राणामर्था उदाहरणानि च लेख्यानि । १२

३ स्वपन्ति, सर्वे, इन्धानः, जाया, कोलाहलः, जानती, शखीश्यामा, गोहितम्, आर्यकुमारः, युक्तारोही, आवसथः, निरुपलम्, सत्यं भो-क्ष्यसे, अग्निम् ।

एषां मध्ये दशसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रदर्शनीयाः ।... २०

१९३०

१ प्रणङ्मर्त्यस्य, प्रण आयूंषि तारिषत, पूर्व्यापः, उभयाविनम्, भरताज्ञात-वेदसम्, नमोभरन्त एमसि, जुजोषत्, कनिक्रदज्जनुषम् । एषु लौकिकरूपप्रदर्शनपुर-स्सरं वैदिककार्याणि प्रदर्शयत ।

२ उपाग्न्यधीयानः । खलप्व्याशा, अग्निर्मूर्धा दिवः ककुत्, उपत्वाग्ने दिवे दिवे, अक्षद्युवा, सेत् पृश्निः सुभ्वे-एषु स्वरप्रक्रिया निर्दिश्यताम् ।

३ सौवर्यः सप्तम्यस्तदन्तसप्तम्यः, स्वरविधौ व्यञ्जनमविद्यमानवत्, स्वरविधौ प्रत्ययलक्षणं न, सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः, इत्येतेषु वचनेषु द्वयोः प्रमाणं प्रयोजनञ्च निर्दिशत ।

४ भूपतिः, दूरादागतः, फलकपुरम् , सुविरेण, कार्णवेष्टकिकम्, एषु कस्कः स्वरो भवति केन केन शास्त्रेण ।

५ बहुव्राहिकः, प्रतिजनः, नेह भोक्ष्यसे, जातु भोक्ष्यसे, काष्ठाध्यापकः, एषु स्वरविधायकानि विशेषशास्त्राणि निर्दिश्यन्ताम् ।

सर्वे प्रश्नाः समानाङ्कभागिनः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१९३१

१ ऋकता गणेन । त्राध्वं नो देवाः । या खर्वेण पिबति तस्यै खर्वः । निष्टर्क्यम् । अवयाः । प्रण आयूंषि तारिषत् । कुशिकासो अवस्यवः । सोमः सधस्थम् । पीत्वी सोमस्य वावृधे । ददिर्गाः । पाथ्यो वृषा । रथीरभूत् ।

येषां मध्ये नवसु प्रयोगेषु यानि विशेषकार्याणि तानि शास्त्रनिर्देशपुरःसरं लेख्यानि । ... १८

२ नेतराच्छन्दसि । उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य । यद्धितुपरं छन्दसि । ष्यपूर्वस्य स्त्रीविषयस्य ।

एषामर्था उदाहरणानि च लेख्यानि । ... १२

३ एकश्रुतिः । सन्नतरः । उपग्रहः । नप् ।

एषां शब्दानामर्थाः प्रदर्शनीयाः । ... २

४ हिंसन्ति । इन्धानः । जाया । स्वाहा । त्रिभिः । मद्रसविधम् । महाव्रीहिः । मल्लग्रामः । उपकूलम् । देवमित्रः । यो भुङ्क्ते । काष्ठाध्यापकः । आग्नेयः ।

एषां मध्ये नवसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः । १८

१९३२

१ मनुष्वदग्ने । दाति प्रियाणि । ब्रह्मवाचम् । गृभाय जिह्वया मधु । दातवाउ । अनुसखा सयूथ्यः । मघव्यः । कथा दाशेम । स तूताव । ईषा अक्षो हिरण्ययः । अस्मे प्रयन्धि । अश्वायन्तो मघवन् ।

एषां मध्येऽष्टसु प्रयोगेषु यानि वैदिकप्रक्रियाकार्याणि तानि शास्त्रनिर्देशपुरःसरं प्रदर्शनीयानि । १६

२ ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे । स्वरितो वानुदात्ते पदादौ । अन्तश्च तवै युगपत् । नब्विषयस्यानिसन्तस्य ।

एषामर्था उदाहरणानि च लेख्यानि । १०

३ शिट् । अवग्रहः । न्यूङ्खाः । यदूवृत्तम् ।

एषां शब्दानामर्था लेख्याः । २

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

४ वोऽश्वाः । चिकीर्षकः । सर्वे । वंहिष्ठः । पट्टुपट्टुः । कौञ्जायनाः । आहवनीये । पाणिन्युपज्ञम् । पञ्चदिष्टिः । गोपालः । सुग्रीवः । आवसथः । हन्त प्रविश ।

एषां मध्येऽष्टसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः । १६

५ गतिकारकोपपदात्कृदिति सूत्रे कृद्ग्रहणप्रयोजनं प्रतिपादनीयम् । ६

१९३३

१ वृषण्वसुः । वृत्रं हनति वृत्रहा । चक्राणा वृष्णिम् । अघ ममार । ददिर्गाः । ईश्वरो विलिखः । चनो दधीत नाद्यो गिरो मे । सोम्यो ब्राह्मणः । ब्रह्मसामं भवति । उपप्रयन्तो अध्वरम् । नू मर्तः । त्मना देवेषु । देवासः । हरिवो मेदिनं त्वा ।

एषां मध्ये नवसु प्रयोगेषु यानि वैदिकप्रक्रियाकार्याणि तानि शास्त्रनिर्देशपूर्वकं प्रदर्शनीयानि । ... १८

२ लोपस्त आत्मनेपदेषु । उदात्तस्वरितपरस्य सन्नतरः । लघावन्ते द्वयोश्च बह्वषो गुरुः । आचार्योपसर्जनश्चान्तेवासी ।

एषामर्थां उदाहरणानि च लेख्यानि । ... १०

३ सर्वस्य । ईड्यः । तिलाः । स्वाहा । आग्नेयः । आहवनीये । गोलवणम् । साङ्काश्यसिद्धः । यूपदारु । तन्तुवायः । स्त्रीसमम् । कश्चिद् भुङ्क्ते । अनुपुरुषः ।

एषां मध्ये नवसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः । १८

४ तिङि चोदात्तवतीति सूत्रे तिङ्ग्रहणप्रयोजनं प्रतिपादनीयम् । ४

१९३४

१ अक्रन्नुषासः । मर्यः । अब्जाः । पताति दिद्युत् । मध्वा जमार । न म्लेच्छितवै । सुमङ्गलीरियं वधूः । तृचं सूक्तम् । अभ्र आँ अपः । इष्टीनं देवान् ।

एषां मध्ये सप्तसु प्रयोगेषु यानि वैदिकप्रक्रियाकार्याणि तानि शास्त्रनिर्देशपूर्वकं प्रदर्शनीयानि । ... १४

२ तयोर्दाहिलौ च च्छन्दसि । स्वाङ्गशिटामदन्तानाम् । उभे वनस्पत्यादिषु युगपत् ।

एषामर्थां उदाहरणानि च लेख्यानि । ... ९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३ चिक्कीर्षकः । पन्थाः । घृतम् । कृपिः । अष्टाभिः । छ । कुमारश्रमणा । विश्वदेवः । अध्ययनपुण्यम् । गौरमुखः ।

एषां मध्ये सप्तसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः, यथाशक्ति स्वरचिह्नानि च प्रदर्शनीयानि । ... १४

४ 'उपमानं शब्दार्थप्रकृतावेव' इति सूत्रे प्रकृतिग्रहणप्रयोजनं प्रतिपादनीयम् । ... ३

५ यद्योभावप्रसन्धानमुकारादि परं पदम् ।
स्वरान्तं तादृशं विद्याद् यदन्यद् व्यक्तमूष्मणः ॥

इत्यस्य सुस्पष्टं व्याख्या कार्या । ... ५

६ विवृत्तिः । अयोगवाहाः । रङ्गः । श्वासी नादी
एषामर्थाः स्पष्टीकरणीयाः । ... ५

१९३५

सूचना—सूत्रनिर्देशप्रसङ्गे समस्तसूत्रोल्लेखनमावश्यकम् ।

१ क्षेत्रस्य पतिना । त्राध्वं नो देवाः । अवायुः । वायवे पिबध्यै । समुद्रिया अप्सरसः । तं प्रत्नथा । एष स्य भानुः । ररन्धि । दक्षिणतः शये । मो षु णः ।

एषां मध्ये सप्तसु प्रयोगेषु यानि वैदिकप्रक्रियाकार्याणि तानि शास्त्रनिर्देशपुरःसरं प्रदर्शनीयानि । ... १४

२ प्रकृत्याऽन्तःपादमव्यपरे । ईषान्तस्य हयादेरादिर्वा । किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् ।

एषामर्था उदाहरणानि च लेख्यानि । ... ८

३ हिंसन्ति । मह्यम् । कल्याणः । आग्नेयः । त्रिभिः । भ्राष्ट्रपकः । आर्यब्राह्मणः । उष्ट्रक्रोशी । उपकूलम् । प्रत्यंशुः ।

एषां मध्ये सप्तसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः, स्वरचिह्नानि च प्रदर्शनीयानि । ... १४

४ "द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ" इति सूत्रेऽकृतसमासान्तस्य मूर्धशब्दस्य ग्रहणे प्रयोजनं प्रतिपाद्य, फिट् सूत्राणां पाणिनीयैरुपादेयत्वं समर्थनीयम् । ... ५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

५ यमस्वरूपं सुस्पष्टं प्रतिपाद्यताम् । ... ४
६ "अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः ।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥"
अस्पृष्टादिस्वरूपप्रतिपादनपुरःसरमस्य व्याख्या कार्या । ... ६

१८३६

सूचना—सूत्रनिर्देशप्रसङ्गे समस्तसूत्रोल्लेखनमावश्यकम् ।

१ नैनं हिन्वन्त्यपि वाजिनेषु । आ प्राद्यावापृथिवी । दधिक्राः । मरुते पतिः । प्रभ्वी । वेशोभगीनः । सुमङ्गलीः । पूषा अविष्टुः । नू मर्त्तः । गत्वाय । प्रमिणन्ति व्रतानि ।

एषां मध्ये सप्तसु प्रयोगेषु वैदिकप्रक्रियाकार्याणि शास्त्रनिर्देशपुरस्सरं प्रदर्शनीयानि । ... १४

२ अनसन्तान्नपुंसकाच्छन्दसि । स्वाङ्गशिटामदन्तानाम् । गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे । स्वरितो वानुदात्ते पदादौ ।

एषामर्थां उदाहरणानि च लेख्यानि । ... ८

३ देवीम् । शरावती । पललम् । नेत्री । पाणिनीयरौढीयाः । ब्रह्मनगरम् । प्रधौतपादः । पर्यन्तः ।

एषां मध्ये पञ्चसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः, स्वरचिह्नानि च प्रदर्शनीयानि । ... १०

४ (क) "अग्निमीळे पुरोहितम्" इत्यस्मिन्पादे स्वरचिह्नैः सह स्वरसंचारप्रकारः प्रदर्शनीयः । ... ३

(ख) "गतिकारकोपपदात् कृत्" अत्र कृद्ग्रहणप्रयोजनं सुस्पष्टं प्रतिपादनीयम् । ... ५

५ मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥
सुस्पष्टं व्याख्यायतां स्वशब्दैः । ५

६ "अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ।" सविशदमेतद् व्याख्याय अयोगवाहाः के ? कथं च तेषामयोगवाहत्वमिति निरूपणीयम् । ५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१९३६

द्वितीयपत्रम् ।

२ आदिरन्त्येनेतिसूत्रं नव्यप्राचीनरीत्या व्याख्यायाक्षिप्तानां मध्यगानां कथं शाब्देऽन्वय इत्यभिधीयताम् । ... १०

२ तस्मिन्निति, तस्मादिति, सूत्रयोर्मतभेदं प्रदर्श्य सिद्धान्तपक्षं स्थापय... १०

३ एकः पूर्वपरयोरित्यत्रत्यैकग्रहणं भाष्यरीत्या प्रत्याख्याय तल्लक्ष्यत्वं परिष्क्रियताम् । ... १०

४ अन्तादिवच्चेति सूत्रं व्याख्याय तस्य स्थानिवत्सूत्रेण गतार्थता सम्भवति नवेति सम्यग् विचार्य्य विधार्य्यताम् । ... १०

५ उत्तरपदत्वे इति वार्त्तिके कार्य्यित्वनिवेशस्य फलप्रमाणे स्तो नवेति प्रतिपाद्यताम् । ... १०

६ ग्रहणवतेति, व्यपदेशिवद्भाव, इति च परिभाषयोर्विषयफलप्रमाणानि निरूपणीयानि । ... १०

सूचना—एषु केचन पञ्चैव प्रश्ना व्याख्येयाः ।

१९३७

१ पत्रम् ।

सूचना—सूत्रनिर्देशप्रसङ्गे समस्तसूत्रोल्लेखनमावश्यकम् ।

१ गामस्य तदहः सभायां दीव्येयुः । शुन्धध्वं दैव्याय कर्मणे देवयज्यायै । अद्य ममार । दातवा उ । सप्तदशाक्षरश्छन्दस्यः । दाधार यः पृथिवीम् । अयं सो अध्वरः । सुश्चन्द्र दस्म । नाभा पृथिव्याः । गृष्टिः ससूव स्थविरम् । त्रिभिष्ट्वं देव सवितः ।

एषां मध्ये सप्तसु प्रयोगेषु वैदिकप्रक्रियाकार्याणि शास्त्रनिर्देशपूर्वकं प्रदर्शनीयानि । ... १४

२ मतुवसो रु सम्बुद्धौ छन्दसि । नब्विषयस्यानिसन्तस्य । आचार्योपसर्जनश्चान्तेवासिनि । उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ।

एषामर्था उदाहरणानि च लेख्यानि । ... १०

३ चिकीर्षकः । केकयः । दातवै । अक्षण्वन्तः । मद्रसवेशम् । पुरोहितम् । उद्दालकपुष्पभञ्जिका । विश्वकर्मा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एषां मध्ये पञ्चसु प्रयोगेषु ससूत्रनिर्देशं स्वरविशेषाः प्रतिपादनीयाः, स्वरचिह्नानि च प्रदर्शनीयानि । ... १०

४ (क) "शृणोत ग्रावाणः" इत्यत्र "ऋचि तुनुघ०" इत्यनेन दीर्घत्ववारण-प्रकारः प्रदर्शनीयः । ... ३

(ख) "पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः" अत्र पूजितग्रहणप्रयोजनं प्रतिपादनीयम् । ... ३

५ त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः सम्भवतो मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥

सुस्पष्टमेतद् व्याख्याय वर्णानां त्रिषष्टित्वं चतुःषष्टित्वं च कथमिति सप्रपञ्चं निरूपणीयम् । ... ५

६ ऊष्मणोऽष्टविधा गतयः सोदाहरणं निरूपणीयाः । ... ५

१९३७

द्वितीयपत्रम् ।

१ "हलन्त्य" मित्यत्रान्योन्याश्रयं तन्त्रादिनोद्धृत्य ग्रन्थोक्तदिशा तन्त्रादि-प्रकारे दूषणं प्रदर्श्य सूत्रावृत्तिः समर्थनीया । ... १०

२ एत्येधत्यूठ्स्वित्यत्रैचोत्यस्यैधतेर्विशेषणत्वं मतान्तरप्रतिक्षेपेण साध-नीयम् । १०...

३ सम्बुद्धौ शाकल्यस्येति शास्त्रे सम्बुद्धिग्रहणप्रयोजनं नव्यप्राचीनमतेना-भिधाय तत्र युक्तः पक्षः प्रदर्शनीयः । ... १०

४ पुंख्यानमित्यत्र रुत्वं निराकृत्य, "पुन्नेतीत्यत्र" आर्षः सन्धिरिति श्रीध-रोक्तिः खण्डनीया । ... १०

५ इदुदुपधस्येति सूत्रेऽप्रत्ययग्रहणप्रयोजनं नव्यमतनिरासेन प्रदर्श्य सिद्धा-न्तार्थः प्रदर्शनीयः । ... १०

६ भोभगो इत्यत्र निपातैर्वार्त्तिकस्यान्यथासिद्धिर्भवति नवेति स्पष्टं निरु-च्यताम् । ... १०

सूचना—एषु पञ्च व प्रश्नाः समाधेयाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पं० श्री केशवमिश्रशास्त्रीजी संपादित—

वैयाकरणसिद्धान्तकौमुद्याः—

१. स्त्रीप्रत्ययादारभ्य चातुरर्थिकान्तप्रक्रियाप्रयोगसूची। प्रश्नपत्र सहित। मूल्य ।)

२. ण्यन्तादिकृदन्तान्तप्रक्रियाप्रयोगसूची। प्रश्नपत्र सहित। मूल्य ।)

३. शैषिकादिद्विरुक्तान्त तद्धितप्रक्रियाप्रयोगस्मृतिसूची ।) प्रश्नपत्र सहित। मूल्य ≡)

४. वैदिकस्वरप्रक्रियाप्रयोगस्मृतिसूची व्याख्याऽमृताख्या युता। प्रश्नपत्र सहित। द्वितीय संस्करण। मूल्य ।)

५. भ्वाद्यादिदशगणप्रक्रियाप्रयोगसूची। (यन्त्रस्थ)

पाणिनीयव्याकरणे वादरत्नम्—

[न्यायव्याकरणाचार्य मीमांसकशिरोमणिना श्रीसूर्यनारायणशुक्लेनविरचितम्]।

इस ग्रन्थ के प्रथमभाग मे न्यास प्रकरण तथा द्वितीय भाग में परिष्कार प्रकरण है। न्यास-परिष्कार का इतना उत्तम ग्रन्थ आज पर्यन्त छपा ही नहीं। इन दोनों भागों को संग्रह करलेने से फिर न्यासरत्नावली, न्यासकौमुदी, पाणिनीयनिग्रक्रोडपत्र, शिशुतोषणी, भावकुतुहल, शास्त्रार्थरत्नावली इत्यादि किसी ग्रन्थ के संग्रह करने की आवश्यकता न होगी।

मूल्य प्रथम भाग १॥) द्वितीयभाग १।) (तृतीय परिशिष्टभाग छपता है)।

फक्किकासरलार्थः—

[द्वितीय संस्करण] [तृतीय संस्करण]

व्याकरणाचार्य पण्डित रामचरित्रत्रिवेदि विरचितः।

संस्कृत प्रेमी विद्यार्थियों को मालुम हो कि आप लोगोंने फक्किका की अनेक प्रकाशित पुस्तकें देखी सुनी होगी। परन्तु हमने आप लोगों के हित के लिए अत्यन्त उपयोगी परीक्षापयोगी फक्किकासरलार्थः नाम की पुस्तक बनवाई है। यह पुस्तक ऐसी उत्तम परीक्षा की रीति से लिखी गई है कि जीममे विद्यार्थियों की समस्त कठिनाई दूर होगई हैं प्रत्येक मध्यम परीक्षार्थी को इस पुस्तक की एक एक प्रति खरीद कर लाभ उठाना चाहिए। द्वितीय संस्करण का मूल्य भी लागत मात्र चारों खण्ड को संपूर्ण पुस्तक का ।≡) छः आना मात्र है।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीगुरुःशरणम् ।

सिद्धान्तकौमुदी ।

(स्त्रीप्रत्ययान्तोभागः)

व्याकरणाचार्य नेने पं० गोपालशास्त्रि विरचित

सरला टिप्पण्या सहिता ।

'रूपलेखनप्रकार-पङ्क्तिलेखनप्रकारा'ख्य परिशिष्ट सहिता च ।

इस पुस्तक का स्त्रीप्रत्ययान्त भाग काशीस्थ गवर्नमेंट संस्कृत पाठशालीय व्याकरण मध्यमा प्रथमखण्ड की परीक्षा में निर्धारित मुद्रित होकर तैयार होगया है, इसमें गवर्नमेंट संस्कृत कालेज बनारस के अध्यापक पण्डित गोपालशास्त्रीनेनेजी की बनायी हुई सरला नामक टिप्पणी दी गई है तथा रूपलेखनप्रकार व पंक्तिलखनप्रकार ऐसे दो परिशिष्ट अंतमें जोड़ दिये गए है परिक्षार्थी छात्रगण को इस से अभूतपूर्व लाभ हुआ है इसका अभ्यास करने से रूप लिखने व पंक्तियों का व्याख्यान करने में विद्यार्थिगण अत्यन्त पटु होंगे, सिद्धान्तकौमुदीकी अनेक टीका टिप्पणी इधर प्रकाशित हुई हैं उन सबका सारांश इसमें होते हुए प्राचीन ग्रन्थकारों के मतोंका भी प्रायः उल्लेख इस टिप्पणी में होने से इस सरला टिप्पणीकी सहायतासे सिद्धान्तकौमुदीका अभ्यास करने वाले छात्रोंको अनेक वैयाकरणके मत मतान्तरका सम्यक् ज्ञान हो सकेगा यह इस ग्रन्थकी विशेषता है अन्तमें सूत्रानुक्रमणिका वार्तिक सूची भी दी गई है जिससे विषय अन्वेषण की भी सुलभता इसमें है। कागज उत्तम, टाईप नया, छपाई सुन्दर है, इतनी विशेषता व सुलभता रहने पर भी दाम लागत मात्र १।) कमीशनकाट कर १) रक्खागया है।

सिद्धान्तकौमुदी (गुटका--संस्करण) समाप्य पाणिनीय-शिक्षा-अष्टाध्यायी-गण-वार्त्तिक-धातु-परिभाषा-उणादि-फिट्सूत्र-लिङ्गानुशासनसूत्रपाठसहित । तथा अष्टाध्यायी आदि ८ आठों सूत्रपाठ की अनुक्रमसूचीसहित । मूल्य ३) लागत मात्र ।

Kirtikant Sharma Collection, Najafgarh